

CANDY TREE

# मुक्तामणि

## संस्कृत पाठमाला

**सहायक पुस्तिक 1-5**

लेखक :
अनुज शर्मा
एम० ए० (संस्कृत)



# मुक्तामणि-1

## 1 वन्दना

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. प्रस्तुत श्लोके सरस्वत्या: देव्या: नमोऽस्तुते।

ख. सरस्वती विशालाक्षि अस्ति।

ग. विद्याया: देवी सरस्वती! माम् विद्यां देहि, अहं प्रणमामि।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** सरस्वती **महाभागे**;
**विद्ये** कमल **लोचने**।
विद्यारूपे **विशालाक्षि**,
**विद्यां देहि** नमोऽस्तुते।।

**3. संस्कृते लिखत।**

**उत्तरम्–**

| | | |
|---|---|---|
| नेत्र | = | नेत्रम् |
| महाभागवती | = | महाभागे (सरस्वती) |
| विद्या | = | ज्ञानम् |
| दो | = | यच्छ (देहि) |

**4. सम्यक् उत्तरं चिह्नङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. i. दो    ख. i. प्रणाम करता हूँ

ग. i. विशाल नेत्र वाली    घ. ii. ज्ञान स्वरूपा

**क्रियात्मकं-कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 2 वर्ण ज्ञानम्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. वर्णानां समूह: वर्णमाला कथ्यते।

ख. स्वरा: त्रयोदश व्यञ्जना: च त्रयस्त्रिंशत् सन्ति।

ग. च वर्गे वर्णा: च छ ज झ ञ

घ. प वर्गे वर्णा: प फ ब भ म

ङ. व्यञ्जनानां पञ्च वर्गा: सन्ति।

**2. सम्यक् उत्तरं चिनुत।**

**उत्तरम्–** क. iii. 13    ख. ii. 5    ग. ii. 25

**3. निम्नलिखितान् मेलयत।**

**उत्तरम्–** क. च — iii. च वर्गः

ख. क — iv. क वर्गः

ग. ट — i. ट वर्गः

घ. त — v. त वर्गः

ङ. प — ii. प वर्गः

**क्रियात्मकं-कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 3 संस्कृतवर्णमाला

## अभ्यासः

**1. निम्नाङ्कितानां चित्राणां नामानि संस्कृते लिखत।**

**उत्तरम्–** क.



**इला**

ख.



**झषः**

ग.



**दीपः**

घ.



**जतुका**

**2. चित्रं पश्यत सम्यक् उत्तरं च चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. ऊ — ख. i. ध

ग. i. भ — घ. ii. र

**3. निम्नलिखितान् वर्णान् एतेषाम् उचितैः शब्दैः सह मेलयत।**

| **उत्तरम्–** | **अ** | | **ब** |
|---|---|---|---|
| क. | ऊ | iii. | **ऊर्णा** |
| ख. | ट | ii. | **टङ्किका** |
| ग. | ज | iv. | **जतुका** |
| घ. | औ | i. | **औषधम्** |
| ङ. | ध | iv. | **धनुः** |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 4 संयुक्त वर्णाः

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. द्वयोः व्यञ्जनयोः मेलनं कृत्वा एकीकरणं 'संयुक्त वर्णः' इति कथ्यते।

उदाहरणम्— क् + ष् + अ = क्ष–अक्ष।

ख. श् + उ + क् + अः = शुकः

ह + अं + स् + अः = हंसः

ग. प्रत्येकः शब्दः केचन वर्णैः मिलित्वा निर्मीयते, परं यदा वयं तान् वर्णान् पृथक् कुर्मः तु सा प्रक्रिया 'वर्णविच्छेदः' इति कथ्यते; तद्यथा—अजः = अ + ज् + अः।

**2. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. i. ज्ञ   ख. ii. द् + य   ग. ii. वर्णविच्छेदः

**3. वर्णसंयोगं कुरुत।**

**उत्तरम्–** क. ब् + आ + ल् + अः = **बालः**

ख. अ + ज् + आ = **अजा**

ग. म् + उ + न् + इ = **मुनि**

घ. प् + उ + ष् + प् + अ + म् = **पुष्पम्**

**4. वर्णविच्छेदं कुरुत।**

**उत्तरम्–** बकः = **ब् + अ + क् + अः**

सारिका = **स् + आ + र् + इ + क् + आ**

मयूरः = **म् + अ + य् + ऊ + र् + अः**

नयनम् = **न् + अ + य् + अ + न् + अ + म्**

कुक्कुरः = **क् + उ + क् + क् + उ + र् + अः**

विद्यालयः = **व् + इ + द् + य् + आ + ल् + अ + य् + अः**

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 5 अमात्रिकाः मात्रिकाश्च शब्दाः

### अभ्यासः

**1. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. (ii) पादपः   ख. (i) गज   ग. (ii) ौ + ा

**2. चित्रं पश्यत उचितं शब्दं च लिखत।**

**उत्तरम्–**

 तक्षकः

 शुकः

 वृकः

 गजः

 नेत्रम्

 नौका

**3. उचितानां मात्राणां प्रयोगं कुरुत।**

**उत्तरम्–** शकः = शुकः   वकः = वृकः

| | | | | | |
|---|---|---|---|---|---|
| कपत: | = | कपोत: | हस: | = | हंस: |
| नत्रम् | = | नेत्रम् | अज | = | अजा |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 6 लिङ्गज्ञानम्

### अभ्यासः

**1. सम्यक् उत्तरं चिह्नाङ्कितं (✓) कुरुत।**

**उत्तरम्–** क. (i) मूषक: ख. (ii) स्त्रीलिङ्गम् ग. (i) मोदकम्

**2. निम्नलिखितानां शब्दानां लिङ्गं लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| मूषक: | = | **पुंल्लिङ्गम्** | मक्षिका | = | **स्त्रीलिङ्गम्** |
| सारिका | = | **स्त्रीलिङ्गम्** | नृप: | = | **पुंल्लिङ्गम्** |
| गृहम् | = | **नपुंसकलिङ्गम्** | अजा | = | **स्त्रीलिङ्गम्** |
| मण्डूक: | = | **पुंल्लिङ्गम्** | लूता | = | **स्त्रीलिङ्गम्** |
| छत्रम् | = | **नपुंसकलिङ्गम्** | बक: | = | **पुंल्लिङ्गम्** |

**3. निम्नाङ्कितानां चित्राणां नामानि संस्कृते लिखत।**

**उत्तरम्–**


वृषभ:


लूता


सारिका


कदलीफलम्


आम्रम्


छत्रम्

**4. अर्थं लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| मण्डूक: | = | **मेढक** | पिपीलिका | = | **चींटी** |
| कदलीफलम् | = | **केला** | वृषभ: | = | **बैल** |
| लोमशा | = | **लोमड़ी** | सारिका | = | **मैना** |
| काक: | = | **कौआ** | पत्रम् | = | **पत्ता** |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 7 वचनानां ज्ञानम्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. संस्कृतभाषायां त्रीणि वचनानि भवन्ति; तद्यथा—एकवचनम्, द्विवचनम्, बहुवचनम्।

ख. 'वाटिका:' इति पदं बहुवचनं प्रदर्शयति।

ग. येषां शब्दानां सङ्ख्यायां द्वयो: बोध: भवति, ते 'द्विवचनम्' इति कथ्यन्ते; तद्यथा—रामौ, लते, पत्रे।

**2. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. (ii) उष्ट्रौ ख. (i) पाटलम् ग. (ii) चटका:

**3. निम्नलिखितानां मेलनं कुरुत।**

**उत्तरम्–**

| | | | |
|---|---|---|---|
| क. | सैनिका: | (iv) | **अनेक सैनिक** |
| ख. | पाटले | (i) | **दो गुलाब** |
| ग. | पादप: | (v) | **पौधा** |
| घ. | चटका | (iii) | **चिड़िया** |
| ङ. | वाटिका: | (ii) | **अनेक बगियाँ** |

**4. निम्नलिखितानां पदानां वचनानि लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| पादपा: | = | **बहुवचनम्** | वाटिके | = | **द्विवचनम्** |
| चटका | = | **एकवचनम्** | छत्रे | = | **द्विवचनम्** |
| उष्ट्र: | = | **एकवचनम्** | पाटले | = | **द्विवचनम्** |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 8 क्रियाज्ञानम्

## अभ्यास:

**1. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. (ii) वदन्ति ख. (iii) लिखति ग. (ii) नमन्ति

घ. (ii) पतत: ङ. (i) क्रीडत:

**2. निम्नलिखितं पूरयत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| क. | लिख् | = | लिखति | **लिखत:** | लिखन्ति |
| ख. | पठ् | = | **पठति** | पठत: | **पठन्ति** |
| ग. | खाद् | = | खादति | **खादत:** | **खादन्ति** |
| घ. | क्रीड् | = | **क्रीडति** | क्रीडत: | **क्रीडन्ति** |
| ङ. | हस् | = | **हसति** | हसत: | **हसन्ति** |

**3. निम्नलिखितानां क्रियाणां धातुभि: सह उचितं मेलनं कुरुत।**

**उत्तरम्–**

| | **क्रिया** | | **धातु:** |
|---|---|---|---|
| क. | कूदना | (vi) | **कूर्द्** |
| ख. | नमस्कार करना | (iv) | **नम्** |

| | | | |
|---|---|---|---|
| ग. | बोलना | (v) | **वद्** |
| घ. | पकाना | (i) | **पच्** |
| ङ. | देखना | (iii) | **दृश्** |
| च. | खेलना | (ii) | **क्रीड्** |

**4. चित्राणि दृष्ट्वा उचिताः क्रियाः लिखत।**

**उत्तरम्–**

| | | |
|---|---|---|
|  |  |  |
| गायति | धावतः | गायन्ति |
|  |  |  |
| गच्छति | पश्यतः | खादन्ति |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 9 सर्वनामज्ञानम्

### अभ्यासः

**1. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. (iii) वह  ख. (i) एते

ग. (iii) बहुवचनम्  घ. (ii) कः

**2. चित्रानुसारं मञ्जूषातः उचित पदं चित्वा रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. **ते** शुकाः सन्ति।  ख. **एते** गजाः सन्ति।

ग. **ते** माले स्तः।  घ. **एते** लूते स्तः।

ङ. **ते** पुष्पे स्तः।  च. **एते** फले स्तः।

**3. सम्यक् मेलनं कुरुत।**

**उत्तरम्–**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | एषः | (vi) | **अयम्** |
| ख. | एतौ | (iii) | **इमौ** |
| ग. | एषा | (v) | **इयम्** |
| घ. | एते | (i) | **इमे** |
| ङ. | एताः | (ii) | **इमाः** |
| च. | एते | (iv) | **इमे** |

**4. अर्थं लिङ्गं च लिखत।**

**उत्तरम्–**

| | अर्थः | लिङ्गम् | | अर्थः | लिङ्गम् |
|---|---|---|---|---|---|
| सः | **वह** | **पुंल्लिङ्गम्** | एषः | **यह** | **पुंल्लिङ्गम्** |

| | | | | | |
|---|---|---|---|---|---|
| तौ | **वे दो** | **पुंल्लिङ्गम्** | एतौ | **ये दो** | **पुंल्लिङ्गम्** |
| सा | **वह** | **स्त्रीलिङ्गम्** | एषा | **यह** | **स्त्रीलिङ्गम्** |
| ताः | **वे सब** | **स्त्रीलिङ्गम्** | एताः | **ये सब** | **स्त्रीलिङ्गम्** |
| तत् | **वह** | **नपुंसकलिङ्गम्** | एतत् | **यह** | **नुपंसकलिङ्गम्** |
| तानि | **वे सब** | **नपुंसकलिङ्गम्** | एतानि | **ये सब** | **नपुंसकलिङ्गम्** |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 10 सङ्ख्यावाचि शब्दाः

### अभ्यासः

**1. चित्रं पश्यत सम्यक् उत्तरं च चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** (क) (iii) द्वे (ख) (ii) चक्राणि (ग) (i) सप्त

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–**

| **पुंल्लिङ्गम्** | **स्त्रीलिङ्गम्** | **नपुंसकलिङ्गम्** |
|---|---|---|
| एकः | **एका** | **एकम्** |
| **द्वौ** | **द्वे** | द्वे |
| **त्रयः** | तिस्रः | **त्रीणि** |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# मुक्तामणि-2

## 1 विधाधनं सर्वधनं प्रधानम्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. विद्या विनयं ददाति।

ख. विनयात् पात्रतां प्राप्नोति।

ग. धनं पात्रत्वात् आप्नोति।

**2. पङ्क्तीः पूरयत।**

**उत्तरम्–** क. विद्या **ददाति विनयम्**।

ख. **पात्रत्वात् धनम्** आप्नोति।

ग. **धनाद् धर्मः** ततः सुखम्।

**3. पाठेषु प्रदत्त श्लोकार्थं लिखत।**

**उत्तरम्–** विद्या विनम्रता देती है तथा विनम्रता से उत्तम पात्रता आती है। उत्तम पात्र बन जाने पर धन आता है तथा धन से धर्म बढ़ता है और धर्म से सुख की प्राप्ति होती है।

**4. वर्णविच्छेदं कुरुत।**

**उत्तरम्–** क. विद्या = **व् + इ + द् + य् + आ**

ख. धनम् = **ध् + अ + न् + अ + म्**

ग. सुखम् = **स् + उ + ख् + अ + म्**

घ. ददाति = **द् + अ + द् + आ + त् + इ**

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 2 कारकपरिचयः

### अभ्यासः

**1. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. अधिकरणकारकस्य    ख. i. सम्बन्ध

ग. ii. सप्त    घ. i. करणकारकस्य

**2. निम्नलिखितानां मेलनं कुरुत।**

**उत्तरम्–**

| | | |
|---|---|---|
| क. अधिकरण | iv. | **में, पे, पर** |
| ख. तृतीया | v. | **से, के साथ, द्वारा** |
| ग. षष्ठी | vi. | **का, की, के** |
| घ. चतुर्थी | iii. | **के लिए, को** |
| ङ. द्वितीया | i. | **को** |

च. प्रथमा ii. **ने**

**3. निम्नलिखितानां कारकाणां चिह्नानि लिखत।**

**उत्तरम्–** अपादान = **से ( अलग होने के अर्थ में )**

करण = **से, के साथ, द्‌वारा**

कर्ता = **ने** अधिकरण = **में, पे, पर**

कर्म = **को** सम्प्रदान = **के लिए, को**

**4. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. विभुः कथां पठति। ख. नेहा पुष्पैः माला रचयति।

ग. पिमामही भोजनं खादति। घ. अध्यापिका कथां श्रावयति।

ङ. सेवकः आम्रम् आनयति।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 3 कर्ताकारकम्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. बालः पठति। ख. छात्रा हसति।

ग. अजा चरति। घ. कोकिला गायति।

ङ. पुष्पं विकसति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. **अध्यापकः** पाठयति।

ख. **कन्या** नृत्यति।

ग. **गजः** चलति।

घ. **मृगः** धावति।

ङ. **मित्रं** लिखति।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. पाठयति ख. i. कन्या ग. iii. मित्रम्

**4. चित्राणि दृष्ट्वा उचितं मेलनं कुरुत।**

**उत्तरम्–** क.  ii. **कूजति**

ख.  iii. **पठति**

ग.  iv. **विकसति**

घ.  i. **पतति**

**5. कर्तापदं चित्वा लिखत।**

**उत्तरम्–** क. गजः  ख. अजा  ग. शशकः
घ. छात्रः  ङ. आरक्षकः

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 4 कर्मकारकम्

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. जनः कार्यालयं गच्छति।
ख. चित्रकारः चित्रं रचयति।
ग. पितामही ईश्वरं स्मरति।
घ. मुनिः यज्ञं करोति।
ङ. सिंहः जलं पिबति।

**2. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. कथाम्  ख. iii. पत्रिकाम्
ग. i. मृगः  घ. iii. वानरः

**3. कर्मपदं चित्वा लिखत।**

**उत्तरम्–** क. मुद्रिकाम्  ख. बीजम्  ग. ईश्वरम्
घ. पत्रिकाम्  ङ. पायसम्

**4. उचितं मेलनं कुरुत।**

**उत्तरम्–**

| | | |
|---|---|---|
| क. वानरः फलं | v. | **खादति** |
| ख. पितामही पत्रिकां | iii. | **पठति** |
| ग. कृषकः बीजं | i. | **वपति** |
| घ. सः चित्राणि | ii. | **पश्यति** |
| ङ. अहं श्लोकं | iv. | **स्मरामि** |

**5. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. माता पत्रिका पढ़ती है।
ख. कहानीकार कहानी लिखता है।
ग. बंदर फल खाता है।
घ. खरगोश पत्ता खाता है।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 5 करणकारकम्

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. राजकुमारः अश्वेन याति।
ख. मृगाः पादैः धावन्ति।
ग. कृषकः हलेन भूमिं कर्षति।
घ. वयं हस्ताभ्यां नमामः।

**2. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. जलेन   ख. i. दण्डेन
ग. iii. नासिकया   घ. ii. नेत्राभ्याम्

**3. दत्तशब्दानां तृतीयाविभक्त्याः रूपाणि लिखत।**

**उत्तरम्–**

| | शब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| क. | जलम् | **जलेन** | **जलाभ्याम्** | **जलैः** |
| ख. | माता | **मात्रा** | **मातृभ्याम्** | **मातृभिः** |
| ग. | नासिका | **नासिकया** | **नासिकाभ्याम्** | **नासिकाभिः** |
| घ. | लता | **लतया** | **लताभ्याम्** | **लताभिः** |

**4. वाक्यानि रचयत।**

**उत्तरम्–** क. ईश्वर **कृपया** वयं स्वस्थाः स्मः।
ख. रावणः **छलेन** सीताम् अहरत्।
ग. माता **छुरिकया** शाकं कृन्तति।
घ. बालः **कन्दुकेन** क्रीडति।

**5. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. राम मित्र के साथ मेले को जाता है।
ख. गाय का बछड़ा अपनी माता के साथ घास खाता है।
ग. वृद्ध डंडे से कुत्ते को पीटता है।
घ. माली जल से पौधों को सींचता है।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 6 सम्प्रदानकारकम्

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. अम्बा बालाभ्यः दुग्धं यच्छति।
ख. बालः विद्यायै सुखं त्यजति।

ग. पुस्तकानि ज्ञानाय भवन्ति।

घ. मालाकारः बालाभ्यां माले रचयति।

ङ. सूर्याय नमः।

**2. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. बालकाय  ख. ii. माले  ग. i. परोपकाराय

**3. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. बालः **विद्यायै सुखं** त्यजति।

ख. माता बालकाय **पायसं** ददाति।

ग. पुस्तकानि **ज्ञानाय** भवन्ति।

घ. मालाकारः **बालाभ्यां माले** रचयति।

**4. 'अ' स्तम्भस्य पदानां 'ब' स्तम्भस्य अर्थैः सह मेलनं कुरुत।**

**उत्तरम्–**

| | **'अ' स्तंभ** | | **'ब' स्तंभ** |
|---|---|---|---|
| क. | विद्यायै | iii. | **ज्ञान के लिए** |
| ख. | याचकाय | i. | **याचक के लिए** |
| ग. | सूर्याय | v. | **सूर्य को** |
| घ. | फलेभ्यः | ii. | **फलों के लिए** |
| ङ. | निर्धनाय | iv. | **निर्धन के लिए** |

**5. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. सेठ याचक को दूध देता है।

ख. पुस्तकें ज्ञान के लिए होती हैं।

ग. बालक पढ़ने के लिए आते हैं।

घ. बाघ शिकार के लिए घूमता है।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 7 अपादानकारकम्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. पत्रं वृक्षात् पतति।

ख. महिला पुष्पाणि वाटिकायाः आनयति।

ग. मेघेभ्यः जलं पतति।

घ. श्रमिकः काष्ठानि वनात् आनयति।

ङ. बालः कुकुरात् भीतः रुदति।

**2. निम्नलिखितेषु वाक्येषु उचितं पदं प्रयुज्य लिखत।**

**उत्तरम्–** क. **लतायाः** पुष्पाणि पतन्ति।

ख. वानरः **वृक्षात्** कूर्दति।

ग. अहं **वाटिकायाः** पुष्पाणि आनयामि।

घ. विभा **देवालयात्** प्रसादम् आनयति।

ङ. **पुष्पात्** गन्धः प्रभवति।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. i. गृहात् ख. iii. मेघेभ्यः

ग. ii. कूपात् घ. ii. पुष्पेभ्यः

**4. मञ्जूषातः समानार्थकपदानि चित्वा लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| आलयम् | = | **गृहम्** | तरुः | = | **वृक्षः** |
| शिक्षकः | = | **अध्यापकः** | पयोदः | = | **मेघः** |
| सुमनम् | = | **पुष्पम्** | उपवनम् | = | **उद्यानम्** |

**5. निम्नलिखितानां क्रियापदानाम् अर्थं लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| आनयति | = | **लाता है** | पतति | = | **गिरता है** |
| निष्कासयति | = | **निकालती है** | प्रभवति | = | **उत्पन्न होती है** |
| रुदति | = | **रोता है** | जायते | = | **होती है** |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 8 सम्बन्धभावः (षष्ठी विभक्तिः)

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. गङ्गायाः जलं पवित्रम् अस्ति।

ख. पर्वतानां राजा हिमालयः।

ग. भ्रमराः कमलानाम् उपरि गुञ्जन्ति।

घ. शशकः वृक्षस्य अधः शेते।

ङ. अश्वस्य बलं प्रसिद्धम्।

**2. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. गङ्गायाः ख. iii. वाटिकायाः

ग. i. बुद्धस्य घ. ii. मकरस्य

**3. षष्ठीविभक्तिपदेन रिक्तस्थानानि पूरयत।**

**उत्तरम्–**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| पुंल्लिङ्गम् | देवस्य | **देवयोः** | **देवानाम्** |
| | **पादपस्य** | पादपयोः | **पादपानाम्** |
| स्त्रीलिङ्गम् | रमायाः | **रमयोः** | रमानाम् |
| | **वाटिकायाः** | वाटिकयोः | **वाटिकानाम्** |
| नपुंसकलिङ्गम् | पुष्पस्य | **पुष्पयोः** | **पुष्पाणाम्** |
| | **मित्रस्य** | **मित्रयोः** | मित्राणाम् |

**4. वाक्यानि रचयत।**

**उत्तरम्–** क. इदं **मम** मित्रस्य पुस्तकम् अस्ति।

ख. गृहस्य समीपं **मन्दिरम्** अस्ति।

ग. **पुष्पस्य** गन्धः मनोहरति।

घ. भीमस्य **बलं** प्रसिद्धम्।

ङ. **वानरः** शाखायाः उपरि उपविशति।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 9 अधिकरणकारकम्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. मीनाः तडागस्य जले तरन्ति।

ख. कमलेषु भ्रमराः उपविशन्ति मधुरं च गुञ्जन्ति।

ग. खगाः वृक्षाणां शाखासु उपविशन्ति।

घ. उद्याने बालाः क्रीडन्ति जनाश्च भ्रमन्ति।

ङ. पुष्पाणि दृष्टवाः बालाः आनन्दिताः भवन्ति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. वने एकः **तडागः** अस्ति।

ख. कमलानि **सुन्दराणि** सन्ति।

ग. वृक्षेषु खगानां **नीडानि** सन्ति।

घ. समीपम् एव एकम् **उद्यानम्** अपि अस्ति।

ङ. उद्याने **बालाः** क्रीडन्ति।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. तडागे  ख. i. नीडेषु  ग. iii. उद्याने

**4. निम्नलिखितेषु वाक्येषु प्रदत्तानि क्रियापदानि पृथक् लिखत।**

**उत्तरम्–** क. पठन्ति  ख. पश्यन्ति, भवन्ति

ग. विकसन्ति  घ. खादथ  ङ. गच्छामि

**5. वाक्यानि रचयत।**

**उत्तरम्–** क. वने एकः **तडागः** अस्ति।

ख. पाटलपुष्पे **भ्रमरः** गुञ्जति।

ग. **नीडे** चटकायाः अण्डानि सन्ति।

घ. **उद्याने** बालाः धावन्ति।

ङ. लतासु **पुष्पाणि** विकसन्ति।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 10 सम्बोधनम्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. मधुरः विद्यालयम् अतः नागतः यतोहि तस्य गृहे अद्य जन्मोत्सवः अस्ति।

ख. भारतवर्षे षड् ऋतवः भवन्ति; तद्यथा—वसन्त-ग्रीष्म-वर्षा-शरद्-हेमन्त-शिशिर इति।

ग. वसन्तऋतौ वृक्षेषु नवीनानि पत्राणि प्रभवन्ति।

घ. सर्वत्र प्रसन्नता एव प्रसन्नता प्रसरति।

ङ. सदाचारी दुःखं न प्राप्नोति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. किं सर्वे **छात्राः** उपस्थिताः सन्ति?

ख. सर्वे **उपस्थितिं** ब्रवन्तु।

ग. सर्वत्र **प्रसन्नता** एव **प्रसन्नता** प्रसरति।

घ. **आचार्यवर!** वयम् अग्रे किं पठिष्यामः?

ङ. **मातृपितृभक्ति** सर्वदा लाभकारी भवति।

**3. सम्यक् उत्तरं चिह्नाङ्कितं (✓) कुरुत।**

**उत्तरम्–** क. iii. प्रविश्य    ख. i. छात्रः

ग. i. तेषाम्    घ. iii. वृक्षेषु

**4. क्रियापदानि चित्वा लिखत।**

**उत्तरम्–** क. प्रविश्य, सम्बोधयति    ख. दृश्यते

ग. ब्रवन्ति    घ. अस्ति

ङ. वहति    च. भवेत

**5. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. भोः मधुर! एतत पुस्तकम् आनय।

ख. भोः बालकौ! युवां किं पठथः?

ग. भोः छात्राः! अद्य वयम् उद्यानकार्यं करिष्यामः।

घ. श्रीमन्! अहं पत्रं लिखामि।

ङ. वसन्तऋतौ पुष्पेषु भ्रमराः गुञ्जन्ति।

**6. वाक्यानि रचयत।**

**उत्तरम्–** क. भो! पार्थ! किं दक्षः गृहं **गतः**?

ख. शृणुत, **आम्रेषु** कोकिलाः कूजन्ति।

ग. वसन्तऋतौ सर्वत्र **प्रसन्नता** एव प्रसन्नता दृश्यते।

घ. शाखासु खगाः **कूजन्ति**।

ङ. आचारहीनः सदा **दुःखं** प्राप्नोति।

च. उपवनस्य सौन्दर्यम् **अति** मनोहरम् अस्ति।

छ. सदाचारी **सुखी** भवति।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 11 शरीरम्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. शरीरस्य पञ्च अङ्गानि सन्ति—शिरः, नयनम्, कर्णः, हस्तः पादश्च।

ख. मुखस्य कार्यं भक्षणम् अस्ति।

ग. दन्तैः भोजनं चर्वामः।

घ. मस्तकस्य शोभा ललाटेन, कपोलाभ्यां केशैः च भवति।

ङ. पादयोः कार्यं चलनम् अस्ति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. शरीरस्य बहूनि **अङ्गानि** सन्ति।

ख. मुखे **दन्ताः** भवन्ति।

नासिकया वयं **पुष्पाणि जिघ्रामः**।

ग. **कर्णाभ्यां** पाठम् आकर्णयामः।

घ. वयं **पादाभ्यां** चलामः।

ङ. पुष्पैः वयं **देवपूजां** कुर्मः।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. शिरः    ख. i. नासिकया    ग. iii. पादौ

**4. संस्कृते लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| गाल | = | **कपोलः** | कान | = | **कर्णः** |
| गर्दन | = | **ग्रीवा** | आँख | = | **नेत्रम्** |
| दाँत | = | **दन्ताः** | पैर | = | **पादः** |
| माथा | = | **मस्तकम्** | मुँह | = | **मुखम्** |
| पेट | = | **उदरम्** | छाती | = | **वक्षःस्थलम्** |

**5. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. एतानि अङ्गानि अस्माकं सहायकानि सन्ति।

ख. केशैः मस्तकस्य शोभा भवति।

ग. शरीरस्य मध्ये उदरम्, वक्षःस्थलं च स्थिते स्तः।

घ. वयं नेत्राभ्यां वस्तूनि पश्यामः।

ङ. अधोभागे पादौ भवतः।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 12 श्रीरामः

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. पाठः श्रीरामस्य विषये अस्ति।

ख. चैत्रमासे शुक्लपक्षस्य नवम्यां तिथौ श्रीरामः अजायत।

ग. ऋषिः वशिष्ठः श्रीरामस्य कुलगुरुः।

घ. श्रीरामस्य भ्रातृणां नामानि सन्ति—भरतः लक्ष्मणः शत्रुघ्नश्च।

ङ. श्रीरामः लङ्केशस्य रावणस्य वधम् अकरोत्।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. इदं **श्रीरामस्य** चित्रम् अस्ति।

ख. श्रीरामाय **नमः**।

ग. तस्य मातुः नाम **कौशल्या** आसीत्।

घ. श्रीरामस्य पुत्रौ **लवकुशौ** आस्ताम्।

ङ. **विश्वामित्रः** श्रीरामस्य गुरुः आसीत्।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. नपुंसकलिङ्गम्  ख. ii. सम्प्रदान

ग. i. द्विवचनम्  घ. ii. आसन्

**4. निम्नलिखितानां पदानां विभक्तिं वचनं च लिखत।**

**उत्तरम्–**

| | पदम् | | विभक्तिः | वचनम् |
|---|---|---|---|---|
| क. | श्रीरामस्य | = | **षष्ठी** | **एकवचनम्** |
| ख. | नवम्याम् | = | **सप्तमी** | **एकवचनम्** |
| ग. | मातृणाम् | = | **षष्ठी** | **बहुवचनम्** |
| घ. | भ्रातरः | = | **प्रथमा** | **बहुवचनम्** |
| ङ. | पुत्रौ | = | **प्रथमा, द्वितीया** | **द्विवचनम्** |

**5. वाक्यानि रचयत।**

**उत्तरम्–** क. भोः छात्राः! **पश्यत** एतत् चित्रम्।

ख. श्रीरामस्य द्वौ पुत्रौ **आस्ताम्**।

ग. श्रीरामः नवम्यां तिथौ **अजायत**।

घ. लक्ष्मणः मेघनादस्य वधम् **अकरोत्**।

ङ. लङ्कायाः अधिपतिः रावणः **आसीत्**।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 13 पिपासितः काकः

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. काकः वने आसीत्।

ख. काकः वृक्षाद् वृक्षम्, नगरात् नगरं ग्रामात् ग्रामं च अभ्रमत्।

ग. आम्, घटे जलं स्वल्पम् आसीत्।

घ. यदा काकः जलमध्ये बहून् पाषाणखण्डान् अक्षिपत् तदा जलम् उपरि आगतम्।

ङ. काकः बुद्धिपूर्वकं यत्नेन सफलतां प्राप्नोत्।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. एकदा **ग्रीष्मर्तौ** सः **पिपासया** अति आकुलः अभवत्।

ख. सहसा सः एकं **घटम्** अपश्यत्।

ग. घटे जलं **स्वल्पम्** आसीत्।

घ. **जलं** पीत्वा सः **सन्तुष्टः** अभवत्।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. आस्ताम् ख. ii. पीकर ग. i. प्राप्स्यथ

**4. निम्नलिखितेषु वाक्येषु प्रयुक्तानि अव्ययपदानि चित्वा लिखत।**

**उत्तरम्–** क. अति ख. च ग. सहसा

घ. शनैः शनैः, उपरि ङ. अपि, तथैव

**5. समानार्थकानि पदानि लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| वनम् | = | **अरण्यम्** | आकुलः | = | **व्याकुलः** |
| जलम् | = | **नीरम्** | वृक्षः | = | **तरुः** |
| काकः | = | **वायसः** | यत्नम् | = | **प्रयासम्** |
| बुद्धिः | = | **प्रज्ञा** | दिवसः | = | **दिनम्** |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 14 रूपाणि

**उत्तरम्–** विद्यार्थी स्वयं करें।

# मुक्तामणि-3

## 1 सरस्वती वन्दना

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. या सरस्वती कुन्दपुष्पमिव, चन्द्रमिव, हिममिव हारम् च इव धवला अस्ति। या श्वेत वस्त्रैः आवृता अस्ति। यस्याः हस्ते वीणा शोभायमाना अस्ति। या सरस्वती श्वेतकमले आरूढा अस्ति। सा मां रक्षतु।

ख. सरस्वती श्वेत पद्मासना अस्ति।

ग. सरस्वत्याः हस्ते वीणावरदण्ड मण्डिताः।

घ. सरस्वतीदेव्या जाड्यापहा।

**2. श्लोकान् पूरयत।**

**उत्तरम्–** या **कन्देन्दु** तषार **हार धवला**,
या **शुभ्रवस्त्रावृता**।
**या वीणावर दण्ड मण्डित** करा,
**या** श्वेत **पद्मासना**।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. शोभायमान ख. i. संज्ञापदम्

ग. iii. कमल के आसन पर

**4. समानार्थकानि पदानि लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| श्वेत | = | **सित** | वन्दिता | = | **अर्चिता** |
| मण्डितः | = | **शोभायमानः** | वस्त्रः | = | **पटः** |
| जाड्यापहा | = | **जड़तां नश्य** | सदा | = | **सर्वदा** |

**5. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. या कुन्दपुष्पम् इव अस्ति।

ख. यस्याः हस्ते वीणा शोभायमाना अस्ति।

ग. या जड़तां हरति।

घ. यस्याः स्तुतिं सदा ब्रह्मा विष्णु महेशश्च कुर्वन्ति।

ङ. सा सरस्वती भगवती मां रक्षतु।

च. या श्वेत पद्मासने आरूढा वर्तते।

**6. वाक्यानि रचयत।**

**उत्तरम्–** क. **सदा** सत्यं वद।

ख. सरस्वती श्वेत **वस्त्रैः** आवृता वर्तते।

ग. सरस्वत्याः हस्ते वीणा शोभायमाना अस्ति।

घ. सरस्वती श्वेत **पद्मासना** अस्ति।

ङ. सरस्वती **श्वेत** वस्त्रानि धारयति।

च. सरस्वती ब्रह्मा विष्णु महेशादैः देवैः सदा **वन्दिता**।

**7. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. जो स्वच्छ वस्त्र पहने हैं।

ख. जो श्वेत कमल के आसन पर बैठी है।

ग. जिनके हाथ उत्तम वीणा से शोभायमान हैं।

घ. जो कुंद के फूल, चन्द्रमा, बर्फ और हार के समान सफेद है।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 2 धेनुः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. धेनोः महत्त्वं मानवजीवने वर्तते।

ख. भारतीयाः धेनुं आदरेण श्रद्धया च पालयन्ति तथा माता इव पूजयन्ति।

ग. वेदेषु, शास्त्रेषु, इतिहासे लोकमान्यतायां च धेनोः विषये वर्णनं प्राप्यते।

घ. धेनोः दुग्धेन निर्मितेन दधितक्रमिष्टान्नघृतमादिना सेवनेन वयं पुष्टाः भवामः।

ङ. धेनोः गोमयस्य गोमूत्रस्य च उपयोगः औषधनिर्माणे, सुगन्धवर्तिकानिर्माणे कीटनाशकद्रव्यनिर्माणे च भवति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. **भारतीय संस्कृतौ** धेनुः प्रधानः पशुः अस्ति।

ख. भारतीयाः तु एनां **माता** इव पूजयन्ति।

ग. **धेनूनां वत्साः** अस्माकं क्षेत्राणि कर्षन्ति।

घ. सा अस्माकं कृते **दुग्धं** ददाति।

ङ. धेनवः मानवानां सर्वदा **उपकारं कुर्वन्ति**।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. भारतदेशे ख. iii. उभौ

ग. i. इन्धनरूपेण

**4. निम्नलिखितानां पदानां विभक्तिम्, वचनं लिङ्गं च लिखत।**

**उत्तरम्–**

| | पदम् | | विभक्तिः | वचनम् | लिङ्गम् |
|---|---|---|---|---|---|
| क. | संस्कृतौ | = | **सप्तमी** | **एकवचनम्** | **स्त्रीलिङ्गम्** |
| ख. | वेदानाम् | = | **षष्ठी** | **बहुवचनम्** | **पुंल्लिङ्गम्** |
| ग. | श्रद्धया | = | **तृतीया** | **एकवचनम्** | **स्त्रीलिङ्गम्** |
| घ. | मानवानाम् | = | **षष्ठी** | **बहुवचनम्** | **पुंल्लिङ्गम्** |
| ङ. | कर्मसु | = | **सप्तमी** | **बहुवचनम्** | **नपुंसकलिङ्गम्** |

**5. क्रियापदानां स्व वाक्येषु प्रयोगं कुरुत।**

**उत्तरम्–** क. भारतीयाः धेनोः आदरेण श्रद्धया च पालनं **कुर्वन्ति**।

ख. भारतीया: जना: धेनुं माता इव **पूजयन्ति**।

ग. धेनव: स्व दुग्धादिना अस्मान् **पोषयन्ति**।

घ. जना: एनां 'गोमाता' इति **कथयन्ति**।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 3 विभिन्नाः पक्षिणः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. मयूर: अस्माकं राष्ट्रिय: पक्षी।

ख. पिक: सुमधुरं कूजति।

ग. हंस: नीरक्षीरविवेकी कथ्यते।

घ. शुक: जनानां वाचम् अनुकरोति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. मयूर: **उपवनेषु** वसति।

ख. हंस: **सरोवरे** वसति।

ग. पिकस्य स्वर: **मधुरो** भवति।

घ. अस्य **कूजनं** सर्वेषां **जनानां चित्तम्** आह्लादयति।

ङ. अयं **मनुष्यस्य** मित्रम् अस्ति।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. मयूर: ख. ii. हंस: ग. i. रक्त:

**4. रेखाङ्कितानां पदानां कारकं वचनञ्च लिखत।**

**उत्तरम्–** क. कर्मकारकम् बहुवचनम्

ख. अधिकरणकारकम् एकवचनम्

ग. कर्ताकारकम् एकवचनम्

घ. करणकारकम् एकवचनम्

**5. निम्नलिखितेषु वाक्येषु प्रदत्तानि सर्वनामपदानि चित्वा लिखत।**

**उत्तरम्–** क. अस्य ख. अयम्

ग. अस्य घ. एनम्।

**6. वाक्यानि रचयत।**

**उत्तरम्–** क. बालिकाया: **नृत्यम्** अतीव शोभनम् आसीत्।

ख. पिकस्य मधुरा ध्वनि: जनानां चित्तम् **आकर्षति**।

ग. राम **एव** तत् कार्यं कर्तुं शक्नोति।

घ. चटकाया: **नीडम्** अति सुन्दरं प्रतीयते।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 4 गणतन्त्रदिवसः

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. 'प्रजया प्रजायै शासनम्' इदृशीं व्यवस्थां वयं गणतन्त्रदिवसरूपे मानयामः।

ख. उत्सवोऽयं प्रतिवर्षं जनवरीमासस्य 26 तमे दिनाङ्के मानयन्ति।

ग. 1950 तमे ख्रीष्टाब्दे जनवरीमासस्य षड्विंशति दिनाङ्के नवीनसंविधानस्य घोषणा अभवत्।

घ. राष्ट्रपतिमहोदयः समारोहे चतुर्भिः अश्वैः आकृष्णमाणे रथे उपविश्य आगच्छति।

ङ. राष्ट्रपतिभवने केन्द्रीये सचिवालये च विद्युद्दीपानां चित्रविचित्रो प्रकाशः भवति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. अस्माकं देशः **1947 तमे ख्रीष्टाब्दे अगस्तमासस्य पञ्चदशे दिनाङ्के** स्वतन्त्रः अभवत्।

ख. गणतन्त्रे **राष्ट्रपतिः** सर्वोच्चः शासकः भवति।

ग. तत्र सेनाः **प्रजाश्च** तम् अभिनन्दन्ति।

घ. तस्य आगते राष्ट्रध्वजस्य **आरोहणं** भवति।

ङ. जनाः विविधानि **युद्धोपकरणानि शोभा दृश्यानि** च दृष्ट्वा मोदन्ते।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. गणतन्त्रदिवसः    ख. i. 1950 तमे वर्षे

ग. i. भारतद्वारम् उभयतः

**4. शब्दार्थान् मेलयत।**

**उत्तरम्–**

| | | | |
|---|---|---|---|
| क. | प्रजायै | iii. | **प्रजा के लिए** |
| ख. | कथ्यते | iv. | **कहलाता है** |
| ग. | देहल्याम् | i. | **दिल्ली में** |
| घ. | आरोहणम् | v. | **फहराना** |
| ङ. | उभयतः | ii. | **दोनों ओर** |

**5. रेखाङ्कितानां पदानां कारकाणि लिखत।**

**उत्तरम्–** क. करणकारकम्    ख. कर्ताकारकम्

ग. अधिकरणकारकम्    घ. सम्बन्ध

ङ. कर्मकारकम्

**6. वाक्यानि रचयत।**

**उत्तरम्–** क. श्वः अस्माकं विद्यालये खेल **समारोहः** भविष्यति।

ख. गणतन्त्रे राष्ट्रपतेः आगते ध्वजस्य **आरोहणः** भवति।

ग. ह्यः **रात्रौ** चन्द्रचन्द्रिका देदीप्यमाना आसीत्।

घ. मम हरिद्वारस्य **यात्रा** सफला अभवत्।

ङ. गणतन्त्रे राष्ट्रपतिः **सर्वोच्चः** शासकः अस्ति।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 5 विजयादशमी

## अभ्यासः

**1. निम्नलिखितानां प्रश्ननाम् उत्तराणि लिखत।**

**उत्तरम्–** क. आश्विनमासस्य शुक्लपक्षे दशम्यां तिथौ विजयादशम्या: उत्सवस्य आयोजनं भवति।

ख. जना: श्रीरामं मर्यादाया:, सत्यस्य सदाचारस्य च प्रतीकं मन्यन्ते।

ग. श्रीरामस्य रावणस्योपरि विजयकारणात् अस्य उत्सवस्य प्रवर्तनम् अभवत्।

घ. अस्मिन् दिवसे बङ्गालप्रान्ते शक्तिरूपाया: सिंहवाहिन्या: दुर्गादेव्या: पूजा भवति।

ङ. विजयादशम्या: उत्सवात् इयं शिक्षा समुपलभ्यते यत् वयं सदा धर्मन्यायमार्गम् अनुसरेम।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. नानाविधेषु **भारतीयोत्सवेषु 'विजयादशमी'** विशिष्टोत्सव: अस्ति।

ख. अस्मिन् दिने एव श्रीराम: **रावणस्य** वधम् अकरोत्।

ग. जना: इमम् उत्सवं **पूर्णेन** उत्साहेन मन्यन्ते।

घ. अयम् उत्सव: **बङ्गालप्रान्ते** दुर्गापूजारूपेण प्रचलितोऽस्ति।

ङ. अत: **धर्माचरणम्** एव वरम्।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. दशम्याम् ख. i. तुमुन्

ग. ii. लट्लकारस्य

**4. रेखाङ्कितानां पदानां धातवः लिखत।**

**उत्तरम्–** क. भू ख. मानय् ग. मन्य् घ. श्रु

**5. वाक्यानि रचयत।**

**उत्तरम्–** क. अस्माकं विद्यालये श्व चित्रप्रतियोगिताया: **आयोजनं** भविष्यति।

ख. कलाकारा: श्रीरामचरितस्य **प्रदर्शनं** कुर्वन्ति।

ग. चलने असमर्थ: रुग्ण: जन: वृक्षम् **आश्रित्य** उपविशति।

घ. एक: गुणी पुत्र: **वरम्**।

ङ. **श्रूयते** यत् अस्मिन् वारे अस्माकं ग्रामेऽपि विजयादशम्या: उत्सवस्य आयोजनं भविष्यति।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 6 सुभाषितानि

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. प्रत्येकस्यां परिस्थितौ महतां स्थितिः समं भवति।

ख. कार्यकाले समुत्पन्ने पुस्तकीया विद्या परहस्ते च गतं धनं व्यर्थम्।

ग. यः उत्सवे, सङ्कटे, अकाले, राष्ट्रविद्रोहे, राजद्वारे श्मशाने च सहैव तिष्ठति स एव बन्धुः।

घ. व्यवहारेण मित्राणि रिपवश्च जायन्ते।

ङ. मणिना वलयेन च करः विभाति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. उदेति **सविता ताम्रः** ताम्र **एवास्तमेति** च।

ख. **कार्यकाले समुत्पन्ने** न सा विद्या न **तद्धनम्।**

ग. राजद्वारे **श्मशाने** च यस्तिष्ठति स **बान्धवः**।

घ. **व्यवहारेण** जायन्ते मित्राणि **रिपवस्तथा।**

ङ. कविना **च विभुर्विभुना कविः कविना विभुना** च विभाति **सभा।**

**3. सम्यक् उत्तरं चिह्नाङ्कितं (✓) कुरुत।**

**उत्तरम्–** क. iii. सप्तमी ख. i. एकवचनस्य

ग. i. कस्यचित् + रिपुः

**4. वाक्यानि रचयत।**

**उत्तरम्–** क. **विद्या**हीनः जनः पशु इव।

ख. यः **दुर्भिक्षे** सह तिष्ठति स एव बन्धुः।

ग. **कविना** राज्ञा चैव विभाति सभा।

घ. न **कश्चित्** अपि कस्यापि मित्रं शत्रु वा भवति।

ङ. सेवकः राज्ञः समक्षं **करः** बद्धवा स्थितः अस्ति।

**5. क्रियापदानि रेखाङ्कितानि कुरुत लिखत च।**

**उत्तरम्–** क. परहस्तगतं धनं सुरक्षितं न तिष्ठति। **तिष्ठति**

ख. दुर्भिक्षे राष्ट्रविप्लवे च यः तिष्ठति स एव बान्धवः। **तिष्ठति**

ग. सविता ताम्रः उदेति। **उदेति**

घ. कविना विभुना च सभा विभाति। **विभाति**

ङ. मित्राणि रिपवश्च व्यवहारेण जायन्ते। **जायन्ते**

**6. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. सूर्य लाल रंग का उदित होता है और लाल ही अस्त होता है।

ख. किसी कार्य के उत्पन्न होने पर न वह विद्या न वह धन किसी काम का।

ग. राजदरबार और श्मशान में जो साथ रहता है वह बंधु है।

घ. मित्र तथा शत्रु व्यवहार से बनते हैं।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 7 चतुरः काकः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. काकः रोटिकाखण्डं खादितुम् आरब्धवान्।

ख. काकात् रोटिकाखण्डं प्राप्तुं श‍ृगालः उपायं चिन्तितवान्।

ग. श‍ृगालः उक्तवान् यत् भवान् पक्षिषु अतीव सुन्दरः वर्णेन च आकर्षकः अस्ति। भवतः स्वरोऽपि मधुरः। भवान् सुन्दरं गायति अतः एकं गीतं गायतु।

घ. स्वकीयां प्रशंसां श्रुत्वा काकः झटिति रोटिकाखण्डं स्व पादयोः अधः स्थापयति।

ङ. स्व दुष्टतायाः आवरणे अवतरिते श‍ृगालः ततः पलायितः।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. एकः **काकः** आसीत्।

ख. सः काकस्य **मुखे रोटिकाखण्डं** दृष्टवान्।

ग. भवतः वर्णः तु अतीव **आकर्षकः**।

घ. कृपया एकं **गीतं** गायतु।

ङ. श‍ृगालः **शिरः अवनम्य** ततः पलायितः।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. अस् ख. iii. तुमन् ग. i. षष्ठी

**4. वाक्यानि रचयत।**

**उत्तरम्–** क. काकः रोटिकां प्राप्तुं **पुनः** उड्डयति।

ख. श‍ृगालः रोटिकां प्राप्तुम् **उपायं** चिन्तयति।

ग. **मम** वार्तां ध्यानेन श‍ृणु।

घ. मह्यं **वचनं** देहि यत् त्वं सदा सत्यं वदिष्यसि।

**5. सन्धिं कुरुत।**

**उत्तरम्–** क. एतत् + अर्थम् = **एतदर्थम्**

ख. पुनः + च = **पुनश्च**

ग. अति + इव = **अतीव**

घ. अति + अन्तम् = **अत्यन्तम्**

ङ. अस्मिन् + अपि = **अस्मिन्नपि**

च. दुर् + जनः = **दुर्जनः**

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 8 बुद्धिर्बलम्

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. सिंह: निर्दय: आसीत्।

ख. सिंहेन नित्यम् अनेकान् पशून् खादनेन दु:खितो भूय सर्वे पशव: सिंह समीपम् अगच्छन्।

ग. सिंह: कूपे स्व प्रतिबिम्बम् अपश्यत्।

घ. क्रोधेन परिपूर्ण: सिंह: अपरं सिंहं हन्तुम् आत्मानं कूपे अक्षिपत्।

ङ. यस्य बुद्धि: तस्य बलम्।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. एकस्मिन् वने **एकः सिंहः** वसति स्म।

ख. शशक: **अति चतुरः** आसीत्।

ग. स मां **अवारयत् खादितुं** च उद्यत: अभवत्।

घ. अस्मिन् कूपे एव **सः सिंहः** वसति।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. अव्ययम्  ख. ii. भूखा  ग. i. आत्मन्

**4. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. कस्मिंश्चित् वने एक: भयानक: सिंह: वसति स्म।

ख. स: नित्यम् अनेकान् पशून् हत्वा खादति स्म।

ग. एकदा सिंह: क्षुधित: आसीत्।

घ. शशक: बुद्धिबलेन सर्वेषां प्राणिनां रक्षाम् अकरोत्।

**5. वाक्यानि रचयत।**

**उत्तरम्–** क. वने एक: चतुर: शशक: **वसति** स्म।

ख. श‍ृगाल: शशकं **हन्तुं** तम् अनुधावति।

ग. सिंह: अपरं सिंहं हन्तुम् **उद्यत**: अभवत्।

घ. सिंह: अति **क्षुधित**: आसीत्।

ङ. श‍ृगाल: **आत्मानं** वनस्य राजा मन्यते स्म।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 9 विज्ञानस्य चमत्काराः

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. वर्तमाने विज्ञानस्य युगम् अस्ति।

ख. दूरदर्शने वयं गृहे एव स्थित्वा देशविदेशानां समाचारान् प्राप्नुमः, सङ्गीतम् आकर्णयामः, मनोरञ्जनाय चलचित्रनाटकादिकं पश्यामः, विविधाः ज्ञानप्रदाः वार्ताः अवगच्छामः, इत्येवं दूरदर्शनस्य उपयोगः।

ग. दूरभाषस्य अयमेव लाभः यत् अनेन वयं दूरेषु नगरेषु देशेषु वा स्थितेभ्यः स्वजनेभ्यो अल्पमूल्येन वार्तादिकं कर्तुं शक्नुमः।

घ. शीतकयन्त्रे वस्तूनि शीतलानि तिष्ठन्ति।

ङ. रॉकेटयाने उपविश्य जनाः चन्द्रम् अपि गन्तुं शक्नुवन्ति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. यत्र अपि **दृष्टिः** गच्छति तत्र एव **विज्ञानस्य चमत्कारं** पश्यामः।

ख. दूरे अन्येषु **नगरेषु देशेषु** वा अपि स्थिताः जनाः **दूरभाषेण** परस्परं **वार्तालापं** कुर्वन्ति।

ग. **सङ्गीतम्** अपि आकर्णयन्ति।

घ. अस्य गतिः **वायुयानात्** अपि द्रुततरा अस्ति।

ङ. चिकित्सायाः क्षेत्रे अपि वयं **विभिन्नान् चमत्कारान्** सर्वत्र पश्यामः।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. i. गम्    ख. iii. क्त्वा    ग. ii. क्त

**4. निम्नलिखितानां पदानां विभक्तिम्, लिङ्गं वचनञ्च लिखत।**

**उत्तरम्–**

| | पदम् | | विभक्तिः | लिङ्गम् | वचनम् |
|---|---|---|---|---|---|
| क. | दृष्टिः | = | **प्रथमा** | **स्त्रीलिङ्गम्** | **एकवचनम्** |
| ख. | दूरभाषेण | = | **तृतीया** | **पुंल्लिङ्गम्** | **एकवचनम्** |
| ग. | विदेशानाम् | = | **षष्ठी** | **पुंल्लिङ्गम्** | **बहुवचनम्** |
| घ. | गीतानि | = | **प्रथमा, द्वितीया** | **नपुंसकलिङ्गम्** | **बहुवचनम्** |
| ङ. | समाचारान् | = | **द्वितीया** | **पुंल्लिङ्गम्** | **बहुवचनम्** |
| च. | चिकित्सायाः | = | **पञ्चमी, षष्ठी** | **स्त्रीलिङ्गम्** | **एकवचनम्** |

**5. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. अद्य वयं सर्वत्र विज्ञानस्य चमत्कारान् पश्यामः।

ख. सङ्गणकयन्त्रेण तु सञ्चारक्षेत्रे क्रान्ति आनीता।

ग. शीतकयन्त्रे खाद्यवस्तूनि चिरं सुरक्षितानि तिष्ठन्ति।

घ. चलदूरभाषं वयं स्व साकं कुत्रापि नेतुं शक्नुमः।

ङ. दूरदर्शनेन वयं विविधं ज्ञानं प्राप्नुमः।

च. समाचारपत्रमपि सञ्चारस्य महत्त्वपूर्णं साधनमस्ति।

## क्रियात्मकं कार्यम्

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 10 रमणीयम् उपवनम्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. उपवने वृक्षाणां पङ्क्तयः सन्ति।

ख. जलेन पुष्पाणि विकसन्ति, सुगन्धितानि मनोहराणि च भवन्ति।

ग. वर्षाकाले उपवनम् अति मनोहरं भवति।

घ. वृक्षाः शस्योत्पादने स्व पत्राणि उर्वरकरूपेण प्रभुज्य अन्नवृद्धिं च कृत्वा कृषकेभ्यः सहायकाः भवन्ति।

ङ. प्रकृतेः सौन्दर्यस्य वृद्धिः करणीया।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. उपवने अनेके **पुष्पपादपाः** अपि सन्ति।

ख. मालाकारः एतान् **वृक्षान् पादपान्** च सिञ्चति।

ग. तैः सह **अध्यापकाः अध्यापिकाश्च** अपि आगच्छन्ति।

घ. विद्यालयस्य प्रधानाचार्यः छात्राणां **समक्षं वृक्षोपकारं** वर्णयति।

ङ. वृक्षः **जनानां** सर्वदा **उपकारं** करोति।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. i. शोभनम्  ख. iii. हरीतिमा  ग. ii. पत्राणि

**4. निम्नलिखितेभ्यः वाक्येभ्यः सर्वनामपदानि पृथक् कुरुत।**

**उत्तरम्–** क. मम  ख. एतान्  ग. अस्याः

घ. तैः  ङ. सः

**5. निम्नलिखितेभ्यः शब्देभ्यः उचितं विशेषणं लिखत।**

**उत्तरम्–** **उन्नताः** वृक्षाः  **सुगन्धितानि** पुष्पाणि

**रमणीयम्** उपवनम्  **प्राज्ञाः** स्त्रीपुरुषाः

**निर्मलं** जलम्  **शीतलः** पवनः

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 11 हरिणकाकौ

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. वने हरिणकाकौ न्यवसताम्।

ख. श्रृगालः हरिणेन सह मैत्रीं तस्य मांसं खादितुम् अकरोत्।

ग. पाशे हरिणः अपतत् मित्रेण काकेन च कथितेन उपायेन सः मुक्तः अभवत्।

घ. क्षेत्रपतिना क्षिप्तस्य लगुडस्य तीव्रेण प्रहारेण श्रृगालः मृतः।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. एकदा एकः शृगालः **हरिणम्** अपश्यत्।

ख. एकदा सः हरिणं **हरिते क्षेत्रे** अनयत्।

ग. सायं काकः **हरिणस्य अन्वेषणम्** अकरोत्।

घ. सः पाशम् **अपाकर्तुम्** आरभत्।

ङ. **तीव्रेण प्रहारेण** शृगालः तत्रैव मृतः।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. i. हरिणमांसम् ख. iii. पाशे

ग. ii. लगुडम् घ. i. पाशम्

**4. शब्दार्थान् मेलयत।**

| | | | |
|---|---|---|---|
| **उत्तरम्–** क. | निवसति | iii. | **रहता है** |
| ख. | अपश्यत् | v. | **देखा** |
| ग. | अनयत् | ii. | **ले गया** |
| घ. | नियोजितवान् | vi. | **लगाया** |
| ङ. | विलोक्य | i. | **देखकर** |
| च. | उत्थाय | iv. | **उठकर** |

**5. निम्नलिखितानां पदानां कारकाणि लिखत।**

| | | | |
|---|---|---|---|
| **उत्तरम्–** वने | = **अधिकरणकारकम्** | हरिणम् | = **कर्मकारकम्** |
| शृगालः | = **कर्ता कारकम्** | वेगेन | = **करणकारकम्** |
| प्रच्छन्नस्य | = **सम्बन्धः** | क्षेत्रात् | = **अपादानकारकम्** |

**6. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. एकस्मिन् वने बहवः पशुपक्षिणः निवसन्ति स्म।

ख. हरिणकाकयोः मैत्री प्रगाढा आसीत्।

ग. एकः शृगालः हरिणम् अपश्यत्।

घ. दुःखितो भूय कृषकः जालम् अप्रसारयत्।

ङ. काकः पाशे बद्धं हरिणम् अपश्यत्।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 12 पद्य पीयूषम्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. काकवत् चेष्टा, बकवत् ध्यानम्, श्वानवत् निद्रा, अल्पभोजी गृहत्यागी च, इत्येतानि पञ्च लक्षणानि सन्ति विद्यार्थिनः।

ख. अभिवादनस्वभावस्थस्य नित्यं वृद्धोपसेविनः च आयुर्विद्यादिकं वर्धते।

ग. अधनस्य मित्रं न भवति।

घ. समुद्रेषु वृष्टिः वृथा अस्ति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. **काकचेष्टाबको** ध्यानं **श्वाननिद्रा** तथैव च।

ख. चत्वारि तस्य **वर्धन्ते आयुर्विद्यायशो** बलम्।

ग. षडेते यत्र **वर्तन्ते तत्र देवः** सहायकृत्।

घ. अलसस्य कुतो **विद्या अविद्यायाः कुतो धनम्।**

ङ. वृथा **तृप्तस्य** भोजनम्।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. कम खाने वाला      ख. i. षड् + एते

ग. iii. अव्ययम्      घ. i. विशेषणम्

**4. वाक्यानि रचयत।**

**उत्तरम्–** क. अस्य बालस्य **लक्षणं** तु साधु प्रतीयते।

ख. कमल! **तत्र** मा उपविश।

ग. रतिः **नित्यं** प्रातः भ्रमणाम गच्छति।

घ. एवं जलं **वृथा** मा कुरु।

ङ. ''अधुना **कुतः** आयासि,'' जनकः अपृच्छत्।

**5. समानार्थकपदानि मेलयत।**

**उत्तरम्–**

| | | | |
|---|---|---|---|
| क. | वृष्टिः | iii. | **वर्षा** |
| ख. | दिवा | v. | **दिवसः** |
| ग. | मित्रम् | i. | **सखा** |
| घ. | नित्यम् | iv. | **प्रतिदिनम्** |
| ङ. | यशः | ii. | **कीर्तिः** |

**6. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. समर्थाय दानं व्यर्थम् अस्ति।

ख. यदि भवान् सहायतां कर्तुम् इच्छति तु निर्धनस्य करोतु।

ग. अधनस्य कश्चित् मित्रं न भवति।

घ. विद्यार्थी शास्त्रेषु उक्तानां पञ्च लक्षणानाम् अनुसरणं कुर्यात्।

ङ. ईश्वरः तस्यैव सहायता करोति यः स्व सहायता स्वयं करोति।

च. वयं सत्कार्यं कुर्वन् जीवनं यापयेम।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 13 वसन्तऋतुः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. भारतदेशे षट् ऋतवः क्रमानुसारम् आगच्छन्ति।

ख. वसन्ते पुष्पाणां सौरभस्य प्रसारः भवति।

ग. वसन्तस्य पर्यायवाचकाः शब्दाः सन्ति—ऋतुराजः, कुसुमाकरः, कुसुमायुधः।

घ. अस्मिन् ऋतौ दिशः स्वच्छाः भवन्ति।

ङ. संसक्तपक्षाः अपि भ्रमराः मधुनः स्वादं प्रति अनवरतं स्वानुरागं प्रकटयन्ति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. तेषु वसन्तः **ऋतुराजः** अस्ति।

ख. **वसन्तस्य स्वागतं** सर्वे जनाः अति आनन्देन कुर्वन्ति।

ग. वसन्ते **आकाशः** अति निर्मलः भवति।

घ. वृक्षेषु **नवपल्लवाः** सर्वेषां मनांसि आकर्षयन्ति।

ङ. पवनेन **प्रकम्पमानाः लताः** नृत्यन्ति इव प्रतीयन्ते।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. सर्वनाम ख. iii. अव्ययपदम्

ग. i. उदकम्

**4. सन्धिं विच्छेदं कुरुत।**

**उत्तरम्–** सु + आगतम् = **स्वागतम्** क्रम + अनुसारम् = **क्रमानुसारम्**

स्व + अनुरागम् = **स्वानुरागम्** कुसुम + आकरः = **कुसुमाकरः**

**5. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. वसंत ऋतुराज कहलाता है।

ख. उनमें वसंत ऋतुराज है।

ग. वसंत सभी प्राणियों के मन को प्रसन्नता करता है।

घ. वसंत में आकाश बहुत निर्मल होता है।

ङ. पक्षियों का चहचहाना भी सुखदायक होता है।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 14 एकः परिवारः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. परिवारः गृहे वसति।

ख. परिवारे पञ्च सदस्याः सन्ति।

ग. कुक्कुरः द्वारे स्थित्वा गृहं रक्षति।

घ. ग्रहाः नव भवन्ति इति शास्त्रवचनम्।

ङ. माता फलानि मोदकानि च आनयति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. एतत् एकं **गृहम्** अस्ति।

ख. **पितामही** अपि **परिवारेण** सह एतस्मिन् गृहे वसति।

ग. **नव** एकः च **दश** भवन्ति। घ. मम दश **अङ्गुलयः**।

ङ. **अष्ट अष्ट** च षोडश भवन्ति। च. अधुना **पूजाकालः**।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. त्रयः ख. ii. दश ग. i. सप्त

**4. परस्परं मेलयत।**

**उत्तरम्–** क. परिवारः iii. **सदस्याः**

ख. कुक्कुरः i. **गृहरक्षा**

ग. हस्त iv. **अङ्गुलयः**

घ. रावणः v. **मुखानि**

ङ. पूजनम् ii. **फलानि**

**5. हिन्द्याम् अनुवादं कुरुत।**

**उत्तरम्–** क. मेरे परिवार में दस सदस्य हैं।

ख. मेरे घर में एक छोटा बगीचा भी है।

ग. मेरी दस उँगलियाँ और दो पैर हैं।

घ. दुकान से पाँच फल लाओ।

ङ. ग्रह नौ होते हैं।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 15 भारतीयाः कृषकाः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. भारतवर्षः कृषिप्रधानः देशः।

ख. कृषकाः परिश्रमिणः भवन्ति।

ग. कृषकाः क्षेत्रे गत्वा क्षेत्रं कर्षन्ति, खरपतवारं निस्सारयन्ति जलेन च सिञ्चन्ति।

घ. कृषकेभ्यः उर्वरकं बीजानि च प्रशासनः ददाति।

ङ. कृषकाः अन्नादिकम् उत्पादयन्ति येन जनानां रक्षा भवति। अतः एतेषां महत्त्वम् अस्ति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. ते **बलिवर्दौ** योजयित्वा क्षेत्रं कर्षयन्ति।

ख. कृषकाः **सूर्योदयात्** पूर्वम् एव **शय्यात्यागं** कुर्वन्ति।

ग. **कृषिव्यवस्थायै** ऋणव्यवस्था अतीव आवश्यकी वर्तते।

घ. **ग्रामपञ्चायतसमिति** कृषकेभ्यः बहुकार्यं करोति।

ङ. एतेषाम् अत्यन्तं **महत्त्वम्** अस्ति।

**3. सम्यक् उत्तरं ( ✓ ) चिह्नाङ्कितं कुरुत।**

**उत्तरम्–** क. ii. सूर्योदयात् पूर्वम् ख. i. आधुनिकैः यन्त्रैः

ग. iii. भारतीय खाद्यनिगमः

**4. वर्णविच्छेदं कुरुत।**

**उत्तरम्–** क. भारतीयः = **भ् + आ + र् + अ + त् + ई + य् + अः**

ख. विपुलम् = **व् + इ + प् + उ + ल् + अ + म्**

ग. सुविधा = **स् + उ + व् + इ + ध् + आ**

घ. विक्रयम् = **व् + इ + क् + र् + अ + य् + अ + म्**

ङ. खरपतवारम् = **ख् + अ + र् + अ + प् + अ + त् + अ + व् + आ + र् + अ + म्**

च. व्यवस्था = **व् + य् + अ + व् + अ + स् + थ् + आ**

छ. पूर्वम् = **प् + ऊ + र् + व् + अ + म्**

**5. रेखाङ्कितानां पदानां वचनं लिङ्गं च लिखत।**

**उत्तरम्–**

| | **वचनम्** | **लिङ्गम्** |
|---|---|---|
| क. | बहुवचनम् | पुंल्लिङ्गम् |
| ख. | द्विवचनम् | पुंल्लिङ्गम् |
| ग. | एकवचनम् | स्त्रीलिङ्गम् |
| घ. | एकवचनम् | नपुंसकलिङ्गम् |
| ङ. | एकवचनम् | नपुंसकलिङ्गम् |
| च. | बहुवचनम् | पुंल्लिङ्गम् |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 16 रूपाणि

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 1 सरस्वती वन्दना

## अभ्यासः

**सरस्वती वन्दना**

**1. निम्नलिखितानां प्रश्ननाम् उत्तराणि लिखत।**

**उत्तरम्–** क. सरस्वती सुर भारति।

ख. सुरभारती वस्त्र वर्णा: धवला अस्ति।

ग. सुरभारती चरणा सुर मुनी वन्दिता।

घ. भगवती सरस्वती मालां, वीणां पुस्तकं च धारणिम्।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** त्वमसि **शरण्या त्रिभुवन** धन्या।

**सुरमुनि** वन्दित **चरणा**।।

नव–रस **मधुरा कविता-मुखरा**।

**स्यित रुचि रुचिरा** भरणा।।

**3. सम्यक् उत्तरं चिह्नाङ्कित ( ✓ ) कुरुत।**

**उत्तरम्–** क. i. सर्वनाम ख. iii. उत्तम पुरुषस्य

ग. ii. देवता

**4. निम्नलिखितानां पदानाम् अर्थं लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| सित | = | **सफेद रंग** | शशि | = | **चंद्रमा** |
| जड़ता | = | **मूर्खता** | ध्वले | = | **सफेद रंग** |
| तुहिन | = | **शीतल** | धारणी | = | **धारण करने वाली** |
| पुस्तक | = | **पुस्तक** | पङ्कज | = | **कमल** |

**5. हिन्द्यानुवादं कुरुत।**

**उत्तरम्–** क. आपके चरणों में प्रणाम करते हैं।

ख. आप ही सबकी शरण योग्य हो,
आपके कारण तीनों लोक धन्य हैं।

ग. देवता एवं मुनि आपके चरणों की वंदना करते हैं।

घ. हमारी मंदता (मूर्खता) को दूर करके हमारी बुद्धि का विकास करें।

ङ. (सरस्वती देवी) वीणा व पुस्तक धारण करने वाली हैं।

**6. वाक्यानि रचयत।**

**उत्तरम्–** क. सरस्वती! वयं तव **शरणं** गच्छाम।

ख. तव कारणात् **त्रिभुवन** धन्या सन्ति।

ग. स्वपाठय पुस्तकात् कोऽपि एका **कविता** लिखत।

घ. **सुरमुनि** वन्दित चरणा।

ङ. वयं सरस्वतीदेव्या: शरणं गच्छाम:।

**7. वर्ण विच्छेदं कुरुत।**

**उत्तरम्–** क. ललित = **ल् + अ + ल् + इ + त् + अ**

ख मानस = **म् + आ + न् + अ + स् + अ**

ग. आसीन = **आ + स् + ई + न् + अ**

घ. त्रिभुवन = **त् + र + इ + भ् + उ + व् + अ + न् + अ**

ङ. भगवति = **भ् + अ + ग् + अ + व् + अ + त् + इ**

**क्रियात्मकं-कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 2 ज्ञानं चेतनायाम्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. आचार्यः ज्ञानस्य विषये पाठयति।

ख. अयं श्रेष्ठः, अयं न, येन तत्वेन च हानिलाभयोः ज्ञानम्, अयं मम अपरस्य वा, किं हितं किं च अहितम् इति ज्ञातुं समर्थो भवति तदैव ज्ञानम् अभिज्ञायते।

ग. चेतनां विना ज्ञानस्य विकासं न भवितुम् अर्हति।

घ. मातापिता आचार्यश्चेति त्रिदेवाः।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. तत् ज्ञानं **चेतनायां** निहितम्।

ख. **शुद्धचेतना** एव शुद्धज्ञानं भवति।

ग. **ज्ञानस्योपार्जनाय** गुरोः कृपायाः आवश्यकता भवति।

घ. अस्माकं **त्रिदेवा** एव सम्माननीयाः सन्ति।

ङ. अस्माभिः एतेषाम् **आज्ञा सर्वदा** पालनीया।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. अधिकरण–एकवचनम् ख. i. भू ग. iii. न

**4. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. गुरोः कृपां विना अस्माकम् अज्ञानान्धकारं दूरं न भवितुं शक्यते।

ख. चेतनाशून्यः मनुष्यः मृतवत् अस्ति।

ग. सर्वे छात्राः सावधानतया शृण्वन्तु।

घ. मातापितागुरुश्च आदरणीयाः भवन्ति।

ङ. शुद्धचेतना एव शुद्धं ज्ञानं भवति।

**5. सर्वनामपदानि रेखाङ्कितानि कुरुत लिखत च।**

**उत्तरम्–** क. कक्षायां सर्वे छात्राः न आसन्। **सर्वे**

ख. अद्य अहं साहित्यविषये पाठयिष्यामि। **अहं**

ग. स एव गुरुः यः अन्धकारात् प्रकाशं प्रति नयति। **स, यः**

घ. गुरुः <u>अस्मत्</u> कृते ईश्वरसदृशः भवति। **अस्मत्**

ङ. <u>एतेषाम्</u> आज्ञा सर्वदा पालनीया। **एतेषाम्**

**6. वाक्यानि रचयत।**

**उत्तरम्–** क. वैभवः सर्वेषु छात्रेषु **श्रेष्ठः** अस्ति।

ख. प्रथमम् ईश्वरेण **चेतना** एव प्रदत्ता।

ग. धनस्य **उपार्जनाय** कदापि अधर्ममार्गं न अनुसरणीयम्।

घ. मातापिता आचार्यश्च **सम्माननीया**: सन्ति।

ङ. नृपस्य **आज्ञा** अस्ति यत् कोऽपि नगरात् बहिः न गच्छेत्।

च. वर्तमाने तु यः शक्तिधनाभ्यां **समर्थः** स एव नेता भवति।

**7. निम्नलिखितानां पदानां लिङ्गम्, विभक्तिं वचनं च लिखत।**

**उत्तरम्–**

| | पदम् | | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| क. | कक्षायाम् | = | **स्त्रीलिङ्गम्** | **सप्तमी** | **एकवचनम्** |
| ख. | हानिः | = | **स्त्रीलिङ्गम्** | **प्रथमा** | **एकवचनम्** |
| ग. | ईश्वरेण | = | **पुंल्लिङ्गम्** | **तृतीया** | **एकवचनम्** |
| घ. | अस्मान् | = | **उभयलिङ्गम्** | **द्वितीया** | **बहुवचनम्** |
| ङ. | अन्धकारात् | = | **पुंल्लिङ्गम्** | **पञ्चमी** | **एकवचनम्** |
| च. | आज्ञायाः | = | **स्त्रीलिङ्गम्** | **पञ्चमी, षष्ठी** | **एकवचनम्** |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 3 सङ्घे शक्तिः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. ग्रामस्थस्य पुरुषस्य चत्वारः पुत्राः कलहं कुर्वन्ति स्म।

ख. स्व पुत्रान् प्रतिदिनं कलहं कुर्वन् दृष्ट्वा सः पुरुषः दुःखितः आसीत्।

ग. पुरुषः चत्वारि काष्ठानि एकत्रितानि कृत्वा क्रमशः सर्वान् पुत्रान् त्रोटितुम् आदिशत्।

घ. सङ्घे शक्तिः कलौयुगे इति लिखितम् गीताशास्त्रे।

ङ. असङ्घठिते भूते सति वृषभाः सिंहस्य भोजनम् अभवन्।

च. परस्परं कदापि कलहं न करणीयम्।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. **सङ्घे** शक्तिः भवति।

ख. ते सर्वदा **परस्परं कलहं** कुर्वन्ति स्म।

ग. स वने गत्वा **वृक्षात्** चत्वारि काष्ठानि आनयत्।

घ. क्षणमेकं ते सरलतया तानि **अत्रोटयन्**।

ङ. अत: **असङ्घठितायाः** इदं फलं जातम्।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. पुत्राः  ख. iii. नपुंसकलिङ्गम्

ग. ii. अनीयर्

**4. क्रियापदानि रेखाङ्कितानि कुरुत लिखत च।**

**उत्तरम्–** क. प्रस्तौमि  ख. गत्वा, आनयत्  ग. त्रोटितुम्, अभवत्

घ. अवगतम्, करिष्यामः  ङ. कृता, अचिन्तयत्

**5. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. अद्य अहं युष्मान् एकां कथां श्रावयिष्यामि।

ख. एकैकं काष्ठं ते सरलतया अत्रोटयन्।

ग. एकत्रितानि काष्ठानि कोऽपि पुत्रः त्रोटितुं न अशक्नोत्।

घ. चत्वारोऽपि वृषभाः पृथक् पृथक् स्थातुम् आरब्धवन्तः।

ङ. गीताशास्त्रे लिखितमस्ति–एकतायां शक्तिः भवति।

च. मिलित्वा कार्यं करणेन कार्यं शीघ्रं सरलतापूर्वकं च भूयते।

**6. वाक्यानि रचयत।**

**उत्तरम्–** क. भक्तौ **शक्तिः** भवति।

ख. सदा **परस्परं** स्नेहेन तिष्ठत।

ग. कदापि **कलहं** न करणीयम्।

घ. कृषकः **लगुडं** नीत्वा वेगेन अधावत्।

ङ. **किञ्चित्** मिष्टान्नं मह्यम् अपि देहि।

च. सिंहस्य कुटिलतया वृषभाणां मैत्री **छिन्ना** अभवत्।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 4 कलहस्य परिणामः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. कृषकः स्व पशून् तृणादिकं चारयितुं नयति स्म।

ख. परस्परम् ईर्ष्यायाः कारणेन अजयोः कलहः भवति स्म।

ग. एकस्य वृक्षस्य पतनेन सेतोः निर्माणम् अभवत्।

घ. वेदनया उभे अजे अरोदताम्।

ङ. कलहस्य परिणामः दुःखदः भवति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. तेषु पशुषु **द्वे अजे** अपि आस्ताम्।

ख. सा नदी ग्रामं **द्विभागयोः** विभजति स्म।

ग. उभे अजे **सेतोः मध्ये** स्थिते अभवताम्।

घ. क्रमेण तयोः **सङ्घर्षः** अभवत्।

ङ. **कलहस्य** परिणामः दुःखदः भवति।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. पशवः ख. ii. अजे ग. i. सङ्घर्षः

**4. क्रियापदानि चित्वा एतेषां लकारं वचनञ्च लिखत।**

**उत्तरम्–**

| | | | | |
|---|---|---|---|---|
| क. | निवसति स्म | = | **लङ् लकारः** | **एकवचनम्** |
| ख. | नेष्यति | = | **लृट् लकारः** | **एकवचनम्** |
| ग. | अवहत् | = | **लङ् लकारः** | **एकवचनम्** |
| घ. | गच्छति | = | **लट् लकारः** | **एकवचनम्** |
| ङ. | कुर्यात् | = | **विधिलिङ् लकारः** | **एकवचनम्** |

**5. समानार्थकानि पदानि लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| सर्वदा | = | **सदा** | वृक्षः | = | **तरुः** |
| चरणः | = | **पादः** | वेदना | = | **पीडा** |
| पूर्वम् | = | **प्राक्** | नदी | = | **सरित्** |
| कलहः | = | **विवादः** | कृषकः | = | **हलधरः** |
| कालः | = | **समयः** | स्तुतिः | = | **प्रशंसा** |

**6. वाक्यानि रचयत।**

**उत्तरम्–** क. कृषकस्य पार्श्वे **केचन** पशवः आसन्।

ख. **प्रायः** तयोः अजयोः कलहः भवति स्म।

ग. तयोः **परस्परं** लेशमात्रमपि स्नेहः नासीत्।

घ. ईर्ष्यायाः **परिणामः** सदा दुःखदायकः भवति।

ङ. सहसा द्वितीया अजा अपि तत्र **आगता** आसीत्।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 5 चतुरः काकः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. काकदम्पती वटवृक्षस्य शाखायाम् अवसताम्।

ख. तस्यैव वृक्षमूले स्थितेन सर्पेन तयोः काकदम्पत्योः शावकाः भक्षिताः आसन् अतः तौ दुःखितौ आस्ताम्।

ग. नद्यां स्नानाय एकः राजपुत्रः आगच्छत्।

घ. काकेन राजपुत्रस्य स्वर्णहारं सर्पस्य बिलस्य उपरि क्षेपणस्य वृत्तान्तं सैनिकाः तम् अकथयन्।

ङ. कठिनमपि कार्यं बुद्धिकौशलेन सम्भवम्।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. **एकस्मिन्** वने **एकः वटवृक्षः** आसीत्।

ख. तस्य वृक्षस्य **शाखायां** स्व शावकैः सह **काकदम्पती** अवसताम्।

ग. तदैव तौ मूले **सर्पम्** अपश्यताम्।

घ. सः स्वकीयं **स्वर्णहारं वस्त्राणाम्** उपरि अस्थापयत्।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. काकदम्पती ख. ii. सर्पः ग. i. स्वर्णस्य

**4. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. वन में नाना प्रकार के वृक्ष थे।

ख. उस वृक्ष की जड़ में एक साँप भी रहता था।

ग. कौए ने साँप के विनाश के लिए उपाय सोचा।

घ. राजपुत्र के सैनिकों ने यह सब देखा।

ङ. उसके बाद वे दोनों सुख से रहे।

**5. सन्धिविच्छेदं कुरुत।**

**उत्तरम्–** क. बहिरागच्छत् = **बहिः + आगच्छत्**

ख. एवमचिन्तयत् = **एवम् + अचिन्तयत्**

ग. वस्त्राणामुपरि = **वस्त्राणाम् + उपरि**

घ. तदैव = **तदा + एव**

ङ. किमपि = **किम् + अपि**

च. अतीव = **अति + इव**

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 6 सुभाषितानि

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. सर्पः दुर्जनात् वरम्।

ख. सज्जनः शान्तिम् आप्नुयात्।

ग. धर्मः निधनेऽपि अनुयाति।

घ. नीतिज्ञाः निन्दन्तु प्रशंसां वा कुर्वन्तु, धनम् आगच्छेत् पूर्णतः समाप्तं वा भवेत्, मरणम् अद्यैव भवेत् अन्यत् कालान्तरं वा परं धीरपुरुषाः सर्वासु स्थितिषु सममेव तिष्ठन्ति ते न्यायात् पथः न प्रविचलन्ति; एतादृशी भवति धीराणां स्थितिः।

ङ. सत्सङ्गतिः जनानां बुद्धेः जडतां हरति, वाण्यां सत्यतां स्थापयति, माने उन्नतिं करोति पापाद् च निवारयति चेतः प्रसादयित्वा कीर्तिं दिक्षु प्रसारयति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. सर्पः कालेन **दशति**।

ख. मुक्त: अन्यान् **विमोचयेत्**।

ग. उत्तमा: जना: प्रारभ्य मध्ये न **विरमन्ति**।

घ. लक्ष्मी यथेष्टं **समाविशतु गच्छतु** वा।

ङ. सत्सङ्गति: **कीर्तिं** दिक्षु तनोति।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. तृतीया  ख. ii. विधिलिङ्

ग. iii. सत्सङ्गति:  घ. i. ह्र

**4. क्रियापदानि चित्वा लिखत।**

**उत्तरम्–** क. विहाय भवेत  ख. भवति  ग. आस्ताम्

घ. अजीवन्  ङ. पठनाय, आगत:।  च. भवति

**5. विपरीतार्थकपदानि लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| दुर्जन: | = | **सज्जन:** | शान्ति: | = | **अशान्ति:** |
| बद्ध: | = | **मुक्त:** | धर्म: | = | **अधर्म:** |
| निन्दा | = | **प्रशंसा** | न्याय: | = | **अन्याय:** |
| यश: | = | **अपयश:** | सत्सङ्गति: | = | **कुसङ्गति:** |

**6. निम्नलिखितानाम् अव्ययानां स्व वाक्येषु प्रयोगं कुरुत।**

**उत्तरम्–** क. अयं वृक्ष: तु अति **उच्च:** अस्ति।

ख. वृक्षस्य **अध:** पथिक: शेते।

ग. अधुना त्वं **कुत:** आयासि?

घ. अयं प्रश्न: **तु** विचारणीय: अस्ति।

ङ. सत्सङ्गति: मानं यश: **च** उन्नयति।

च. **पुन:** पुन: निवारितेऽपि वृषभ: क्षेत्रे प्राविशत्।

**7. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. अध्ययनशीला एव जीवने सफलतां प्राप्नुवन्ति।

ख. विद्याया: परं नान्यत् अपरं धनम्।

ग. दुर्जन: पदे पदे दशति।

घ. सतां सङ्ग: कल्याणकरं भवति।

ङ. सत्सङ्गति: जीवनं सम्यक् दिशि नयति।

च. धीरपुरुषा: स्व पथ: न प्रविचलन्ति।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 7 धनस्य महत्त्वम्

## अभ्यास:

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. संसारे सर्वश्रेष्ठं वस्तु धनम् इति।

ख. धनं विना न्यायालये न्यायो न भवितुं शक्यते अपरञ्च विद्यार्थी विद्योपार्जनं न कर्तुं शक्यते।

ग. धनहीनस्य मित्राणि न भवति।

घ. निर्धनता समस्तानाम् आपदानां गृहम्।

ङ. धनसम्पदाभिः सम्पन्न एव कुलीनः, विद्वान्, वेदज्ञः, गुणज्ञः, वक्ता दर्शनीयः च भवति। तेनैव स अवगुणैः परिपूरितोऽपि समाजे मानं प्राप्नोति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. धनं विना विद्यार्थी **विद्योपार्जनं** कर्तुं न शक्यते।

ख. तस्य स्वजनाः अपि **परकीयाः** भवन्ति।

ग. धनं विना **शीलशशिनः कान्तिरपि** परिम्लायते।

घ. निर्धनता समस्तानाम् **आपदानां** गृहम् अस्ति।

ङ. संसारे सर्वे गुणाः **काञ्चनमाश्रयन्ति**।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. धनं विना  ख. i. सुखसागरम्  ग. iii. कुलीनाः

**4. शब्दार्थान् मेलयत।**

**उत्तरम्–**

| | **शब्दः** | | **अर्थः** |
|---|---|---|---|
| क. | प्रतिभाति | v. | **प्रतीत होती है** |
| ख. | आपदाः | iv. | **आपदाएँ** |
| ग. | न्यायालये | iii. | **कचहरी में** |
| घ. | विद्योपार्जनम् | i. | **ज्ञान अर्जित करना** |
| ङ. | धनोपार्जनम् | ii. | **धनसंग्रह** |

**5. रेखाङ्कितानां पदानां धातवः लिखत।**

**उत्तरम्–** क. सिद्ध्  ख. प्रति + भा

ग. सम् + भू  घ. कृ

**6. समानार्थकानि पदानि लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| विद्या | = | **ज्ञानम्** | पार्श्वे | = | **समीपे** |
| संसारे | = | **लोके** | अभिलाषा | = | **इच्छा** |
| आपदानाम् | = | **विपत्तीनाम्** | धनम् | = | **वित्तम्** |
| जनः | = | **नरः** | गृहम् | = | **सदनम्** |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 8 सुदामा श्रीकृष्णश्च

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. सुदामा कृष्णस्य सखा।

ख. सुदाम्नः भार्या तं श्रीकृष्णस्य समीपं सहायतायै धनम् आनेतुं गन्तुं कथयति।

ग. श्रीकृष्णः प्रेम्णा तण्डुलान् अभक्षयत्।

घ. स्व गृहम् आगत्य सुदामा अति प्रसन्नः अतः अभवत् यतोहि तस्य गृहं धनधान्येन पूर्णं वैभवसम्पन्नं च जातम् आसीत्।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. श्रीकृष्णः साम्प्रतं **द्वारिकायां** राज्यं करोति।

ख. सः भवते **यथेष्टं धनं** दास्यति।

ग. सः तं **कुशलक्षेमम्** अपृच्छत्।

घ. इदं सर्वं **तस्यैव प्रसादम्** इति मत्वा अति **प्रसन्नौ** जातः।

ङ. **सङ्कोचवशात्** सुदाम्ना न किमपि याचितम्।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. सम्बन्धभावस्य ख. i. द्विवचनस्य

ग. iii. अव्ययम्

**4. हिन्द्यामनुवादं कुरुत।**

**उत्तरम्–** क. श्रीकृष्ण द्वारिका में राज्य करते थे।

ख. वे उपहारस्वरूप चावल लेकर द्वारिका गए।

ग. मित्र को सिंहासन पर बिठाकर उनका चरण प्रक्षालन किया।

घ. अपने घर को देखकर सुदामा आश्चर्यचकित हुए।

ङ. संकोचवश कुछ भी न माँगकर सुदामा घर लौट आए।

**5. प्रत्ययशब्दान् चित्वा लिखत।**

**उत्तरम्–** क. ज्ञात्वा, आनेतुम् ख. दृष्ट्वा, भूय, प्रसार्य

ग. समर्पयितुम्, आदाय घ. उपवेश्य, नीत्वा

ङ. मत्वा, प्रणम्य

**6. वाक्यानि रचयत।**

**उत्तरम्–** क. सुदाम्नः भार्या दरिद्रतायाः कारणेन अति **पीडिता** आसीत्।

ख. सुदामा भगवतः श्रीकृष्णस्य **सखा** आसीत्।

ग. **साम्प्रतं** तु एतत् ज्ञापयतु यत् भ्रातृजायया मह्यं किम् उपहारं प्रदत्तम्?

घ. भगवान श्रीकृष्णः तान् तण्डुलान् खादित्वा अति **आनन्दितः** अभवत्।

ङ. सुदामा श्रीकृष्णस्य प्रसादं **मत्वा** अति प्रसन्नो अभवत्।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 9 विद्यालयस्य वार्षिकोत्सवः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. बालयोः मध्ये विद्यालयस्य वार्षिकोत्सवस्य विषये वार्ता भवति।

ख. वार्षिकोत्सवे विविधाः स्पर्धाः सांस्कृतिकाः कार्यक्रमाश्च भविष्यन्ति।

ग. वार्षिकोत्सवे प्रतिभाप्रदर्शनार्थम् अवसरः भविष्यति।

घ. शिल्पा वार्षिकोत्सवकार्यक्रमे एकं गीतं गास्यति।

ङ. यः प्रत्येकस्यां गत कक्षायां सर्वाधिकान् अङ्कान् प्राप्तवान् स पुरस्कृतः भविष्यति।

च. वार्षिकोत्सवकार्यक्रमे मुख्यातिथिः शिक्षासचिव महोदयः अस्ति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. अस्माकं विद्यालये कदा **वार्षिकोत्सवः** भविष्यति?

ख. अहं **स्पर्धायां** भागं न ग्रहीष्यामि।

ग. अहं **मूकाभिनयं** करिष्यामि।

घ. स एव **विजेतृभ्यः छात्रेभ्यः** पुरस्कारं प्रदास्यति।

ङ. चलत, **कक्षाध्यापिका महोदया सम्भवतः** अस्माकं **प्रतीक्षायां** स्यात्।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. i. मध्यमपुरुषस्य      ख. iii. सह + एव

ग. ii. तुमुन्

**4. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. भोः अजय! त्वम् अद्य विद्यालयं न गमिष्यसि?

ख. गमिष्यामि, परं विलम्बेन।

ग. अहं सङ्गीतप्रतियोगितायां भागं नयामि।

घ. कार्यक्रमानन्तरं सर्वेभ्यः फलमिष्टान्नस्य वितरणं भविष्यति।

ङ. कार्यक्रमे स्वागतभाषणं विद्यालयस्य प्राचार्य महोदयः करिष्यति।

च. उत्सवे प्रदर्शिताः समेऽपि कार्यक्रमाः मनोरञ्जकाः शिक्षाप्रदाश्च आसन्।

**5. निम्नलिखितानां क्रियापदानां पुरुषम्, वचनं लकारं च लिखत।**

**उत्तरम्–**

| | क्रियापदम् | पुरुषः | वचनम् | लकारः |
|---|---|---|---|---|
| क. | भवेः | **मध्यमपुरुषः** | **एकवचनम्** | **विधिलिङ् लकारः** |
| ख. | नम | **मध्यम पुरुषः** | **एकवचनम्** | **लोट् लकारः** |
| ग. | अजायन् | **प्रथम पुरुषः** | **बहुवचनम्** | **लङ् लकारः** |
| घ. | कुर्मः | **उत्तम पुरुषः** | **बहुवचनम्** | **लट् लकारः** |
| ङ. | स्यात् | **प्रथम पुरुषः** | **एकवचनम्** | **विधिलिङ् लकारः** |

**6. रेखाङ्कितानां क्रियापदानां धातवः लिखत।**

**उत्तरम्–** क. ज्ञा      ख. आगम्      ग. कृ

घ. चल्      ङ. दा. (यच्छ्)

**7. वाक्यानि रचयत।**

**उत्तरम्–** क. एतादृशः **अवसरः** पुनः न लप्स्यते।

ख. अहं तु सङ्गीतप्रतियोगितायां **भागं** नयामि।

ग. अहम् एकं देशभक्तिगीतं **गास्यामि**।

घ. होलिकाया: उत्सव: **उल्लासस्य** प्रतीक: अस्ति।

ङ. चित्रप्रतियोगितायां यया प्रथमं स्थानं प्राप्तं तस्यै लप्स्यते **पुरस्कार**:।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 10 मूर्खो गर्दभः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. मित्रे गर्दभशृगालौ आस्ताम्।

ख. रात्रौ इतस्तत: परिभ्रमन् गर्दभ: स्व कालं यापयति स्म।

ग. गर्दभ: प्रसन्नो भूत्वा शृगालम् अकथयत् यत् मित्र! शोभना रात्रि अस्ति, सुन्दर: समय: अस्ति शशी च गगने राजते, अहमेकं गीतं गास्यामि, सावधानतया शृणु कथय, केन स्वरेण गायानि इति।

घ. गदर्भस्य अभिप्रायं ज्ञात्वा शृगाल: अचिन्तयत् गर्दभोऽयं मूर्ख:, अयं दण्डम् अर्हति। अत: एनं परिहरामि।

ङ. कृषकेन लगुडेन भृशं ताडनेन गर्दभ: मृतप्राय: अभवत्।

च. मूर्खताया: परिणाम: सदा हानिकारक: भवति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. कस्मिंश्चिद् **ग्रामे** एक: **रजकः** आसीत्।

ख. तयो: मित्रता परस्परं **प्रगाढासीत्**।

ग. गर्दभ: यथारुचि: **कर्कटिका**: अखादत्।

घ. गर्दभ: **गातुम्** आरब्धवान्।

ङ तव **मूर्खतायाः** एव अयं परिणाम:।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. i. अनेक: ख. ii. क्त्वा ग. ii. मम

**4. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. गर्दभाय कर्कटिका: अति रोचन्ते स्म।

ख. स: जनकेन सह जयपुरं गमिष्यति।

ग. त्वं रामायणम् अवश्यं पठ।

घ. वयं सर्वे गीतं गास्याम:।

ङ. स: मित्रेण सह वार्तालापं करोति।

**5. वाक्यानि रचयत।**

**उत्तरम्–** क. गर्दभ: **मूर्खः** आसीत्।

ख. तौ स्नेहेन **परस्परं** वार्तालापं कुरुत: स्म।

ग. याचकः भिक्षायै **इतस्ततः** भ्रमति।

घ. एवं गर्दभशृगालयोः प्रगाढा **मित्रता** अभवत्।

ङ. तयोः मध्ये **प्रगाढः** स्नेहः आसीत्।

**6. क्रियापदानि रेखाङ्कितानि कुरुत।**

**उत्तरम्–** क. वसति स्म — ख. आसीत्

ग. वहति स्म — घ. गत्वा, भुक्ताः

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 11 रक्षाबन्धनम्

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. विजयादशमी, दीपावली, होलिका, रक्षाबन्धनम् इत्येते महोत्सवाः आयोज्यन्ते भारतवर्षे।

ख. प्रतिवर्षं श्रावणमासस्य पूर्णिमायां भवति रक्षाबन्धनोत्सवः।

ग. रक्षासूत्रं भगिन्याः प्रेम्णः प्रतीकम् अस्ति।

घ. भगिन्यः भ्रातॄणां दीर्घायुष्यं जीवनं च कामयन्ति।

ङ. रक्षाबन्धनम् एकतायाः अखण्डतायाश्च द्योतकम् अस्ति।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. एतद् महोत्सवं जनाः **हर्षोल्लासेन** मानयन्ति।

ख. सर्वत्र **आनन्द एव आनन्दः** भवति।

ग. भगिन्यः **भ्रातॄणां करेषु** रक्षासूत्राणि बध्नन्ति।

घ. भ्रातरः भगिनीभ्यः **उपहाराणि** प्रयच्छन्ति।

ङ. रक्षाबन्धनं परस्परं **स्नेहस्य** प्रतीकम् अस्ति।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. प्रति — ख. iii. सब जगह

ग. i. नपुंसकलिङ्गस्य

**4. वर्णविच्छेदं कुरुत।**

**उत्तरम्–** क. दृष्टान्तः = **द् + ऋ + ष् + ट् + आ + न् + त् + अः**

ख. श्रावणः = **श् + र् + आ + व् + अ + ण् + अः**

ग. पवित्रः = **प् + अ + व् + इ + त् + र् + अः**

घ. प्रतीकम् = **प् + र् + अ + त् + ई + क् + अ + म्**

ङ. भ्राता = **भ् + र् + आ + त् + आ**

च. विशिष्टः = **व् + इ + श् + इ + ष् + ट् + अः**

**5. समानार्थकान् शब्दान् लिखत।**

**उत्तरम्–** जनः = **नरः** कर्म = **कार्यम्**

अनेके = **बहवः** स्नेहः = **प्रेम**

करः = **हस्तः** उत्सवः = **समारोहः**

**6. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. अस्माकं देशे अनेके उत्सवाः मान्यन्ते।

ख. रक्षासूत्रं भगिनीनां प्रेम्णः प्रतीकम् अस्ति।

ग. अयमुत्सवः एकतायाः अखण्डतायाः च प्रतीकः अस्ति।

घ. अयं 'श्रावणी' इत्यस्य नाम्नः प्रसिद्धः अस्ति।

ङ. अयं हिन्दूनां विशिष्टः उत्सवः अस्ति।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 12 पञ्चामृतम्

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. प्रियवाक्यप्रदानेन सर्वे जन्तवः तुष्यन्ति।

ख. सत्यं प्रियं ब्रूयात्।

ग. चन्द्रचन्दनयोः मध्ये शीतला साधु सङ्गति अस्ति।

घ. परोपकाराय वृक्षाः फलन्ति, नद्यः वहन्ति, गावः दुहन्ति, इदं शरीरमपि परोपकाराय एव अस्ति।

ङ. विपत्तौ धैर्यम्, सम्पन्नतायां क्षमावान्, सभायां वाक्चतुरः, युद्धे वीरत्वम्, यशः शास्त्रादिषु रुचिः इति महात्मनां प्रकृति सिद्धम्।

**2. श्लोकपङ्क्तीः पूरयत।**

**उत्तरम्–** क. तस्मात् तदेव **वक्तव्यं वचने का** दरिद्रता।

ख. प्रियं च **नानृतं ब्रूयात्** एषः **धर्मः सनातनः**।

ग. चन्दनं **शीतलं लोके** चन्दनादपि **चन्द्रमा** ।

घ. विपदि **धैर्यमथाभ्युदये क्षमा** सदसि **वाक्पटुता युधि** विक्रमः।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. बहुवचनस्य  ख. iii. सुनना चाहिए

ग. i. परोपकाराय

**4. क्रियापदानि चित्वा लिखत।**

**उत्तरम्–** क. भाषते  ख. ब्रूयात्  ग. फलन्ति, वहन्ति

घ. अनुसरेयुः  ङ. कुर्याम

**5. संस्कृते अनुवादं कुरुत।**

**उत्तरम्–** क. वयं सदा मधुराणि वचनानि वदेम।

ख. सत्यं प्रियं च वक्ता सर्वेषां स्नेहपात्रं भवति।

ग. चन्दनचन्द्रश्च; उभौ अपि शीतलतायाः परिचायकौ स्तः।

घ. वृक्षाः परोपकाराय फलन्ति।

ङ. अप्रियं सत्यं न वक्तव्यम्।

**6. वाक्यानि रचयत।**

**उत्तरम्–** क. मधुरेषु वचनेषु **दरिद्रता** न स्यात्।

ख. मरणादनन्तरं **धर्मः** एव याति परलोके।

ग. सदा सज्जनानां **सङ्गतिः** कुरुत।

घ. इदं **शरीरम्** अपि परोपकाराय एव अस्ति।

ङ. **क्षमा** वीरेभ्यः शोभते।

च. विपत्तौ सदा **धैर्यं** स्थापयत।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 13 ईश्वरचन्द्र विद्यासागरः

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. ईश्वरचन्द्रस्य विद्यासागरस्य जन्म बङ्गप्रान्तस्य मेदिनीपुर जनपदस्य वीरसिंहग्रामे अभवत्।

ख. विद्यासागरः मार्गे किलोमीटर इति सूचकं पाषाणखण्डं दृष्ट्वा आङ्गलाङ्कानां ज्ञानम् अकरोत्।

ग. अतियोग्यताकारणेन ईश्वरचन्द्रः 'विद्यासागर' इति नाम्ना ख्यातः अभवत्।

घ. एकादशे वर्षात्मके वयसि सः कुमार सम्भवरघुवंशादिकानां साहित्यिकग्रन्थानां व्याख्यां कर्तुं समर्थः आसीत्।

ङ. विद्यासागरः सञ्चितेन धनेन अपरेषां साहाय्यं करोति स्म।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. सः **1820** तमे वर्षे जन्म गृहीतवान्।

ख. सः **बाल्यावस्थायां** पित्रा सह **कोलकातानगरं** गच्छति स्म।

ग. सः कक्षायां **प्रथमं स्थानं** लब्धवान्।

घ. अद्यतनात् आरभ्य अहमेव भोजनं **पक्ष्यामि**।

**3. सम्यक् उत्तरं चिह्नाङ्कित ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. दृश्   ख. iii. अभवत्   ग. ii. तस्मै

**4. निम्नलिखितानां पदानां विभक्तिम्, वचनं लिङ्गञ्च लिखत।**

**उत्तरम्–**

| | पदम् | | विभक्तिः | वचनम् | लिङ्गम् |
|---|---|---|---|---|---|
| क. | उपाधिम् | = | **द्वितीया** | **एकवचनम्** | **स्त्रीलिङ्गम्** |
| ख. | पित्रा | = | **तृतीया** | **एकवचनम्** | **पुंल्लिङ्गम्** |
| ग. | ग्रन्थान् | = | **द्वितीया** | **बहुवचनम्** | **पुंल्लिङ्गम्** |
| घ. | अम्ब! | = | **सम्बोधनम्** | **एकवचनम्** | **स्त्रीलिङ्गम्** |
| ङ. | पुस्तकानाम् | = | **षष्ठी** | **बहुवचनम्** | **नपुंसकलिङ्गम्** |

**5. प्रत्ययान् पृथक् कुरुत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| प्राप्य | = | **ल्यप्** | कर्तुम् | = | **तुमुन्** |
| धृत्वा | = | **क्त्वा** | सञ्चितम् | = | **क्त** |
| दर्शनीयम् | = | **अनीयर्** | लब्धवान् | = | **शानच्** |

**6. विपरीतार्थकपदानि लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| जन्म | = | **मृत्युः** | शीतलम् | = | **उष्णम्** |
| ज्ञानम् | = | **अज्ञानम्** | प्रथमम् | = | **अन्तिमम्** |
| समर्थः | = | **असमर्थः** | सेवकः | = | **स्वामि** |

**7. वाक्यानि रचयत।**

**उत्तरम्–** क. ग्रामप्रधानः धनधान्यैः **सम्पन्नः** अस्ति।

ख. विद्यासागर महोदयः बाल्यात् एव **श्रमनिष्ठः** आसीत्।

ग. स्व सत्कार्यैः धनिकः सम्पूर्णे नगरे **ख्यातः** अभवत्।

घ. किं त्वम् अस्य श्लोकस्य व्याख्यां कर्तुं **समर्थः** असि?

ङ. स **एकाकी** एव वनं गमनाय हठं करोति।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

# 14 स्वामिविवेकानन्दः

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. 1863 तमे वर्षे स्वामिविवेकानन्दस्य जन्म अभवत्।

ख. रामकृष्णपरमहंसमहोदयस्य स्पर्शमधिगत्य एषः समाधिस्थः अभवत्।

ग. अस्य भाषणम् आकर्ण्य श्रोतारः अस्य प्रशंसितारः अभवन्।

घ. सः लोकसेवायै 'रामकृष्ण मिशन' इति संस्थायाः स्थापनाम् अकरोत्।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. बाल्यकालादेव सः **अति मेधावी** आसीत्।

ख. बाल्यकाले विवेकानन्दस्य नाम **नरेन्द्रनाथः** आसीत्।

ग. स्वामिविवेकानन्दः स्व **भाषणम्** आरभत्।

घ. स्वामिविवेकानन्दः लोकसेवायै **'रामकृष्णमिशन' इति संस्थायाः** स्थापनामकरोत्।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. कर्तृ   ख. iii. एकस्याम्

ग. iii. लङ्लकारस्य

**4. सर्वनामपदानि रेखाङ्कितानि कुरुत।**

**उत्तरम्–** क. <u>सः</u> निखिले विश्वे विख्यातः अस्ति।

ख. <u>तस्य</u> महापुरुषस्य जन्म 1863 तमे वर्षे अभवत्।

ग. <u>तस्मात्</u> क्षणादेव <u>सः</u> <u>तं</u> स्व गुरुम् अमन्यत्।

घ. <u>तस्मिन्</u> सम्मेलने <u>सः</u> भारतस्य प्रतिनिधित्वम् अकरोत्।

**5. सन्धिविच्छेदं कुरुत।**

**उत्तरम्–** क. बाल्यकालादेव = **बाल्यकालात् + एव**

ख. स्नातकोऽभवत् = **स्नातकः + अभवत्**

ग. परलोकमगच्छत् = **परलोकम् + अगच्छत्**

घ. स्पर्शमधिगत्य = **स्पर्शम् + अधिगत्य**

ङ. समाधिस्थोऽभवत् = **समाधिस्थः + अभवत्**

च. क्षणादेव = **क्षणात् + एव**

**6. वर्णविच्छेदं कुरुत।**

**उत्तरम्–** क. निर्माणम् = **न् + इ + र् + म् + आ + ण् + अ + म्**

ख. संस्कृतिः = **स् + अं + स् + क् + ऋ + त् + इ + अः**

ग. रुचिः = **र् + उ + च् + इ + अः**

घ. श्रोता = **श् + र् + ओ + त् + आ**

ङ. प्रतिनिधिः = **प् + र् + अ + त् + इ + न् + इ + ध् + इ + अः**

**7. वाक्यानि रचयत।**

**उत्तरम्–** क. सः न केवलं भारते **अपितु** सम्पूर्णे विश्वे विख्यातः अस्ति।

ख. बाल्याकालात् एव अर्जुनस्य **रुचिः** धनुर्विद्यायाम् आसीत्।

ग. सः परमात्मनः साक्षात्काराय महत् **तप**: अकरोत्।

घ. अस्याः कथायाः **सार**: स्व शब्देषु लिखत।

ङ. तदनन्तरं नरेन्द्रनाथः तं **स्व** गुरुः अमन्यत।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 15 स्वतन्त्रतादिवसः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. अस्माकं देशः प्रायः द्विशतवर्षं यावत् आङ्गलीयानाम् अधीनः आसीत्।

ख. अनेकैः महापुरुषैः वीरैश्च स्व जीवनं आङ्गलीयानाम् अत्याचारैः मुक्त्यर्थं देशस्य च स्वतन्त्रतायै समर्पितम्।

ग. विद्यालये राष्ट्रध्वजं प्राचार्यः आरोहयति।

घ. राष्ट्रगाने भूते सति सर्वे सावधानाः तिष्ठन्ति।

ङ. वयं देशरक्षायै कटिबद्धाः भवेम।

**2. रिक्तस्थानानि पूरयत।**

**उत्तरम्–** क. दिवसोऽयं **स्वतन्त्रता** कथ्यते।

ख. सर्वे **राष्ट्रध्वजं** प्रणमन्ति **राष्ट्रगानं** च गायन्ति।

ग. विद्यालये विविधाः **सांस्कृतिकाः कार्यक्रमाः** भवन्ति।

घ. अन्ते प्राचार्यः **सन्देशान्** पठति।

ङ. अयम् अस्माकं **गौरवस्य** दिवसः।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. iii. आङ्गलीयानाम् अत्याचारेण

ख. ii. 15 अगस्त, 1947 तमे वर्षे

ग. ii. त्रिवर्णीयः

**4. रेखाङ्कितानां पदानां विभक्तिं लिङ्गं च लिखत।**

| | | |
|---|---|---|
| **उत्तरम्–** क. | षष्ठी विभक्तिः | पुंल्लिङ्गम् |
| ख. | प्रथमा विभक्तिः | पुंल्लिङ्गम् |
| ग. | द्वितीया विभक्तिः | नपुंसकलिङ्गम् |
| घ. | द्वितीया विभक्तिः | नपुंसकलिङ्गम् |
| ङ. | द्वितीया विभक्तिः | नपुंसकलिङ्गम् |
| च. | चतुर्थी विभक्तिः | स्त्रीलिङ्गम् |

**5. वाक्यानि रचयत।**

**उत्तरम्–** क. **यावत्** त्वं न आगमिष्यसि तावत् अहम् अत्रैव प्रतीक्ष्ये।

ख. भारतदेशस्य स्वतन्त्रतायाम् अनेकानां वीराणां **महत्** योगदानम् अस्ति।

ग. सर्वे राष्ट्रध्वजं प्रणम्य राष्ट्रगानं **च** गीत्वा प्राचार्यस्य भाषणं श्रृण्वन्ति।

घ. दुर्जना: सदा **स्व** हितमेव साधने तत्परा: तिष्ठन्ति।

ङ. **सर्वदा** देशरक्षायै कटिबद्धः स्थातव्यम्।

**6. निम्नलिखितानां क्रियापदानां धातवः लिखत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| स्थास्यति | = | **स्था, तिष्ठ्** | कथ्यते | = | **कथ्** |
| तिष्ठेम | = | **तिष्ठ्** | नेष्यामः | = | **नी, नय्** |
| आसन् | = | **अस्** | घ्रास्यति | = | **घ्रा, जिघ्र्** |
| भवेम | = | **भू** | समर्पयन्ति | = | **समर्पय्** |

**7. वर्णविच्छेदं कुरुत।**

**उत्तरम्–** क. स्वतन्त्रता = **स् + व् + अ + त् + अ + न् + त् + र् + अ + त् + आ**

ख. भारतीयाः = **भ् + आ + र् + अ + त् + ई + य् + आ + अः**

ग. प्रायः = **प् + र् + आ + य् + अः**

घ. प्राचार्यः = **प् + र् + आ + च् + आ + र् + य् + अः**

ङ. त्रिवर्णम् = **त् + र् + इ + व् + अ + र् + ण् + अ + म्**

च. दिवसः = **द् + इ + व् + अ + स् + अः**

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 16 मातृममता

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. जनाः न्यायालयपरिसरे न्यायाधीशस्य निर्णयं श्रोतुम् सङ्कुलिताः अभवन्।

ख. न्यायालये द्वे स्त्र्यौ आगते।

ग. एकस्य बालकस्य उपरि स्वाधिकाराय तयोः मध्ये विवादः आसीत्।

घ. न्यायाधीशस्य निर्णयं श्रुत्वा रमायाः स्थितिः मूर्च्छिता इव जाता आसीत्।

ङ. न्यायविदः अतः धन्यः यतोहि तेन बुद्धिपूर्वकं तयोः स्त्र्योः न्यायः कृतः।

**2. रिक्तस्थानानि पूयत।**

**उत्तरम्–** क. **द्वाभ्यां रक्षकाभ्यां सह** द्वे स्त्र्यौ **न्यायालये** आगते।

ख. एका स्त्री एकं **बालकम्** अङ्के निधाय **स्थिता आसीत्**।

ग. **न्यायाधीशः** तयोः वार्तां श्रृणोति।

घ. द्वौ अधिकारिणौ **विवादितौ** न्यायालयम् आगतवन्तौ।

ङ. लतायाः अङ्के **शतं** जीवेत् अयं मम **आशीषः**।

च. सर्वे जनाः **प्रसन्नाः** अभवन्।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. ii. सप्तमी ख. iii. अव्ययम् ग. i. द्विवचनम्

**4. रेखाङ्कितानां पदानां लिङ्गं वचनञ्च लिखत।**

| | | |
|---|---|---|
| **उत्तरम्–** क. | पुंल्लिङ्गम् | एकवचनम् |
| ख. | पुंल्लिङ्गम् | एकवचनम् |
| ग. | स्त्रीलिङ्गम् | एकवचनम् |
| घ. | नपुंसकलिङ्गम् | एकवचनम् |
| ङ. | पुंल्लिङ्गम् | बहुवचनम् |

**5. वाक्यानि रचयत।**

**उत्तरम्–** क. न्यायलयपरिसरे अनेके जनाः न्यायं श्रोतुम् एकत्रिताः **अभवन्**।

ख. **सहसा** एकः तेजस्वी बालकः सभायाम् उपस्थितः।

ग. नृपः ध्यानपूर्वकं तयोः वार्तां **शृणोति**।

घ. **मातृममता** सर्वोपरि भवति।

ङ. न्यायाधीशेन बुद्धिपूर्वकं न्यायं **कृतम्**।

**6. निम्नलिखितानां पदानाम् अर्थं लिखत।**

| | | | |
|---|---|---|---|
| **उत्तरम्–** सङ्कुलिताः | = **एकत्रित** | हस्तमुकुलितेन | = **हाथ जोड़े हुए** |
| प्रतीयन्ते | = **लगते हैं** | आसन्दिका | = **कुर्सी** |
| श्रावयितुम् | = **सुनाने के लिए** | जीवेत् | = **जिए** |

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 17 व्याकरणम्

**उत्तरम्–** विद्यार्थी स्वयं करें।

# मुक्तामणि-5

## 1 वन्दना

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. परमेश्वरेन पुष्पं विचित्रम्।
ख. पृथ्वी सर्वं सहा।
ग. सहस्रांशु सूर्यः।
घ. महोदधिः लवणाक्तः।

**2. श्लोकान् पूरयत।**

**उत्तरम्–** क. वन्द्यः पिता महाकोशो **पूज्या माता वसुन्धरा।**
**ध्येयं सदा परं ब्रह्म** येनेदं धार्यतेऽखिलम्।।
ख. सर्वे भवन्तु सुखिनः **सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्न्तु** मा कश्चिद् दुःखभाग भवेत्।।

**3. सम्यक् उत्तरं चिह्नाङ्कितं ( ✓ ) कुरुत।**

**उत्तरम्–** क. i. संज्ञा  ख. i. स्त्रीलिङ्गम्
ग. iii. विश्व + आत्मा

**4. सन्धि विच्छेदं कुरूत।**

**उत्तरम्–**

| | | | | | |
|---|---|---|---|---|---|
| क. | महोदधिः | = | महा | + | उदधिः। |
| ख. | निरामयाः | = | निर् | + | आमयाः। |
| ग. | सर्वात्मने | = | सर्व | + | आत्मने। |
| घ. | विश्वात्मने | = | विश्व | + | आत्मने। |
| ङ. | लवणाक्त | = | लवण | + | अक्तः। |
| च. | सहस्रांशु | = | सहस्र | + | अंशु। |

**5. संस्कृते अनुवादं कुरूत।**

**उत्तरम्–** क. येन सूर्यो सहस्रांशुः कृतः तस्मै परमात्मने नमः।
ख. वयं प्राणदं परमेश्वरं नमामि।
ग. पृथ्वी अस्माकं माता अस्ति।
घ. सर्वेजनाः भद्राणि पश्यन्तु।
ङ. सर्वान् जनान् ईश्वरः सुखिनः कुरु।

**6. पाठयांशम् आधारे समयक् विशेषणां रेखाङ्कित कुरुत।**

**उत्तरम्–**

| | | | |
|---|---|---|---|
| क. | पृथ्वी | — | ताम्र, <u>अन्नदा</u>, निम्नगा। |
| ख. | जलम् | — | शक्लीकृतम, अन्नदम, <u>जीवदम्</u>। |
| ग. | परब्रह्म | — | हेयम्, <u>ध्येयम्</u>, प्रेमम्। |
| घ. | वायुः | — | सहस्रांशु, विचित्रतः, <u>प्राणदः</u>। |
| ङ. | चन्द्रः | — | प्राणदः, <u>शीतलीकृतः</u>, लवणाक्तः। |

**7. पर्यायवाची पदानां लिखत।**

**उत्तरम्–** पृथ्वी = भूः, धरा।
चन्द्रः = शशिः, इन्दुः।
वायुः = पवनः, समीरः।
सूर्यः = भानुः, रवि।
माता: = जननी, अम्बा।

**क्रियात्मकं कार्यम्**

**उत्तरम्–** विद्यार्थी स्वयं करें।

## 2 परिश्रमैव समृद्धिः

### अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

**उत्तरम्–** क. भगवान् हरिः स्वर्गनरको निर्मापयितुम् अचिन्तयत्।
ख. सर्वैः जनैः स्वर्गं गमनेन नरकं निष्क्रियं जातम्।
ग. यमराजः हरेः समीपं गत्वा प्रार्थयत् यत् अहं स्वाधिकारं त्यक्तुम् इच्छामि, कृपया माम् अस्मात् भारात् मोचयतु।
घ. कमला हरिः च पृथ्वीलोके अपश्यताम् यत् सर्वे जनाः स्व स्व कर्मसु निरताः सन्ति। तेषां श्रमेणैव तत्र सुखं समृद्धिः च शोभेते स्म।
ङ. कमलायाः वैभवेन मुग्धे सति पृथ्वीलोके इदं परिवर्तनम् अभवत् यत् जनाः श्रमत्यागम् अकुर्वन् येन शनैः शनैः सुखसमृद्धि विलुप्ता सदाचारश्च नष्टोऽभवत्।
च. परिश्रमः समृद्धेः मूलम् अस्ति।

**2. रिक्तस्थानानि पूरयत।**

